आरण्यकम् सितम्बर 2011 ISSN 0975 - 0061
अर्धवार्षिकं संस्कृतशोधपत्रम् आर.एन.आई. सं.58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका हिन्दीपद्यानुवादसहितम्)
   - स्व. पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
   -श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   - श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
   41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
   21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. वज्रभूषणमिश्र 'आक्रान्तः'
   51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
   51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
   60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
   204 रूप्यकाणि

# आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्

## संस्कृतप्रसारपरिषद्
आरा (विहारः)

अष्टादशं वर्षम्, द्वितीयोऽङ्कः
सितम्बर 2011

## 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः) मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कं पञ्चाशत् (50) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चविंशतिः रूप्यकाणि वर्त्तते। शुल्कं धनादेश/ड्राफ्टमुखेन प्रेषणीयम्।
   (क) धनादेश(M.O) द्वारा शुल्कप्रेषणं **श्री नीलमणि पाठकः, रामेश्वरलीला सदनम्, महावीरस्थान, मौलाबाग, आरा( विहार )-802301** दूरभाषः-09431451895 नाम्ना करणीयम्।
   (ख) बैंक ड्राफ्ट **'संस्कृतप्रसारपरिषद्'** इति नाम्ना **'आरा'** ( विहारः ) नगरे व्यवहरणीयं कृत्वा **श्रीनीलमणि पाठकस्य** उपरिलिखिते (3.क इत्यत्र) सङ्केते प्रेषणीयम्।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते। अस्वीकृता लेखा निर्धारित-'स्टाम्प'-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. 'आरण्यक'सम्बद्धः लेखप्रकाशनसमीक्षादिविषयकः सर्वविधपत्रव्यवहारः **डॉ. गोपबन्धु मिश्रः, प्रोफेसर, संस्कृतविभागः, काशी हिन्दू विश्व-विद्यालयः, वाराणसी-221005 इति सङ्केतेन** दूरभाषः-0542-2310561, (चलः) 09450870788 विधेयः।
    Email-gopabandhuh@gmail.com

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्

वर्षाङ्कौ - अष्टादशं वर्षम्, द्वितीयोऽङ्कः

आश्विनः, वि.सं. २०६८

सितम्बर, २०११

प्रतिवर्ष प्रकाशनकालः
चैत्रः, आश्विनः-विक्रमाब्दः
मार्च, सितम्बर

प्रत्यङ्कम् - २५ रूप्यकाणि
संयुक्ताङ्कः - ५० रूप्यकाणि
वार्षिकं शुल्कं ५० रूप्यकाणि

**परामर्शदात्री समितिः**
डॉ. सुरेशचन्द्र गो. काण्टावाला, बड़ोदरा
डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

सम्पादकः
**प्रो. गोपबन्धु मिश्रः**
संस्कृतविभागः
काशी हिन्दू विश्वविद्यालयः, वाराणसी
वर्तमानः अतिथ्यध्यापकः (संस्कृतम्)
सोर्बोन नोवेल विश्वविद्यालयः, पेरिस (फ्रान्स)
Email-gopabandhuh@gmail.com

सह-सम्पादकः
**डॉ. सुनीलकुमार प्रधानः**
Email-sunilkumarp435@gmail.com

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
रामेश्वरलीलासदनम्
महावीरस्थानम्
मौलाबाग, आरा (विहारः) 802301

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

## सम्पादकीयम्

जीवनस्य दर्शनं स्थानकालपात्रैः भिद्यते। मात्रास्पर्शतः समुत्पद्यमानाः समागच्छन्तो वा शीतोष्णसुखदुःखस्वरूपा अनुभवा यथास्थिति यथा सौढव्याः तदनुसृत्य तत्तत्स्थानादिसंश्लिष्टस्य जीवनस्य दर्शनं तदितरात् भिन्नं भवति। शैत्याधिक्यं चेत् अहोरात्रं गात्रेषु उष्णवस्त्राच्छादनम् औष्ण्याधिक्ययुतात् स्नानशौचसहजवस्त्र-परिधानोत्तमाङ्गशीतलीकरणाद्याचरणसहितात् जीवनयात्राविधेः भिद्यते। किं च एतयोः मिथः स्नानव्यतिहारे पुनः विद्यमानस्थानानुगणपरिधानान्नपानादिसेवनं तयोरेव परिवर्तते इति सुतरां लक्ष्यते। किन्तु, जीवनस्य दर्शनं कामम् अवस्थानुगुण्येन परिवर्तनां नाम, दार्शनिकं जीवनं नैव परिवर्तते। पुष्पस्य आकारः वर्णः गन्धः च स्वतन्त्रः भिन्नो भिन्नश्च भवति, किन्तु बीजम्, अङ्कुरोद्गमः पत्राणि, शनैः शनैः विकासः, काले आगते कलिका, ततः पुष्पम्, सुरक्षायां सत्याम् अतिपाते य काले अधः पतनम् इत्येष क्रमः तस्य सर्वत्र भवत्येव। एतस्मिन् क्रमे स्थानादिबाह्यप्रभावभावितं पुष्पं कुत्रचित् शीघ्रं कुत्रचिद् वा विलम्बेन विकसति, किन्तु अरण्यं भवतु अथवा नगरम्, कोऽपि वीक्षताम् उत न, काचित् स्वमस्तके शृङ्गारसज्जामुद्दिश्य घटतु उत न-सर्वास्ववस्थासु पुष्पं तु यथानुकूल्यं विकसत्येव, एतस्मिन् विषये तस्य स्वातन्त्र्यं नास्ति। एतदस्ति पुष्पस्य दार्शनिकं जीवनम्।

मनुष्यस्यापि तथैव एतद् मौलिकं यद् जीवनं तद् दार्शनिकमेव, तत्तु कदापि नतराद् भिद्यते, न च तत्र किमपि वैयक्तिकं स्वातन्त्र्यम् आद्रियते। मातुः गर्भे आगमनात् परं यथाकालं तत्र आङ्गिकविकासः प्राणसञ्चयः भोजनादिशारीरिकवृत्ति-निर्वृतिः तथा च यथाकालं भुवि आविर्भावः, ततश्च शैशवं कौमार्यमित्याद्यवस्थामुखेन गतिः, शीतोष्णसुखदुःखादिसाहित्यम् इति एतद्यद् जीवनं तद् दार्शनिकमेव, किं च तदेव वास्तविकम्, तत्र कस्यापि व्यावर्तनपरिवर्तननिराकरणाद्यधिकाराऽभावात्। अतः विश्वस्मिन् यत् किमपि चिन्तनं विमर्शः उद्भावनम् औत्कर्ष्यं च तत् सर्वं जीवनस्य दर्शनं पुरस्कृत्यैव प्रवर्तते। सर्वत्र दार्शनिकं जीवनम् अङ्गीकृत्यैव केन विधिना नियत्या नियते एतस्मिन् जीवने समधिक आनन्दोऽनुभूयेत किं च एतस्य नियतजीवनस्य सर्वाधिकः उत्तम उपयोगो विधीयेत तदर्थमेव सर्वाणि दार्शनिकानि

चिन्तनानि भौतिकानि च वैज्ञानिकानि विवेचनानि प्रभवन्ति। तद्यथा–पुष्पे विकसिते अथवा विकसिष्यमाणे विकसति च तस्य सुरक्षा, उपयोगः अथवा तद्विषये ताटस्थ्यमित्यादि लौकिको व्यवहारो दृश्यते, किन्तु पुष्पं पुनः व्यावर्त्य तस्य बीजस्वरूपानयनम् उत पतिते पुष्पे पुनर्जीवनदानमित्यादि अशक्यमेव। तद्वत् सर्वेषु अस्माकं चिन्तनविधिषु एकस्य अपरिहार्यस्य अपरिवर्तनीयस्य च दार्शनिकजीवनस्य अङ्गीकारः मूलताम् आवहति। तदङ्गीकारम् अनु तस्य स्वभावः गतिः वैविध्यमित्यादि विमृश्यत एव। यश्चिन्तनविधिः यावद्दाढ्र्येन तद् दार्शनिकजीवनम् अङ्गीकरोति तस्य चिन्तनप्रक्रिया तत्सारांशः तत्फलश्रुतिश्च तावद् वैशिष्ट्यम् अधिगच्छति। या चिन्तनप्रक्रिया तद्दार्शनिकजीवनम् आमुख्यतया गणयति अथवा केवलं योगायोगेन केवलं भौतिकशरीरमेलनादिकारणेन उपलभ्यमानम् अस्तीति मत्वा स्वमतम् उपस्थापयितुं यतते सा तथा दाढ्र्यं नाधिरोहति। अत एव एतन् मौलिकं सत्यमाश्रित्य अग्रे सरद् भारतीयं जीवनदर्शनं सुतरां स्थायितां विशिष्टतां च आवहति।

इदानीमयं प्रश्न उदेति–दार्शनिकं जीवनं जीवाम उत जीवनस्य दर्शनमनुसरामः? वस्तुतः वयं दार्शनिकं वास्तविकम् अपरिहार्यं वा जीवनमेव जीवामः, प्रत्येकं जीवनदर्शनस्य तदाश्रयेणैव प्रवर्तनात्। अतः दार्शनिकं जीवनम् अविस्मृत्य एव जीवनदर्शनम् अनुचिन्तयामश्चेत् तादृशम् अस्मदीयं जीवनं सार्थक्यम् अधिगमिष्यति। केवलम् आजन्ममरणावधिकमेव सत्यम् अर्थात् 'अहमस्मि संसारोऽस्ति, नाहम्, नायं च संसार' इति अदार्शनिकं व्यामोहग्रसितं जीवनमाश्रित्य जीवामश्चेत् तदितरेभ्यः प्राणिभ्यो नैव तद् विशिष्येत किं च तादृशं जीवनं भारतीयजीवनदर्शनम् अविरुध्य न प्रवर्तेत।

'आरण्यकम्' इदं सर्वतोभावेन विविधचिन्तनविधिना तदेव दार्शनिकजीवनाश्रितं यद् भारतीयं चिन्तनं विविधेषु शास्त्रेषु काव्येषु वा प्रावर्तत प्रवर्तते च तद् अन्विष्यतां प्राच्यपाश्चात्यलेखकचयानां लेखैः पुष्टिम् आधत्ते तथा च समेषां पाठकानां बौद्धिक पोषणम् अभिकाङ्क्षमाणं च सत् आत्मानं प्रस्तौति।

गोपबन्धु मिश्र
सम्पादकः, आरण्यकस्य

सितम्बर, 2011



# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| १. आर्यशान्तिदेवानुसारं क्षान्त्या समं तपो नास्ति | डॉ. मङ्गलारामः<br>सहाचार्यः, संस्कृतविभागः,<br>जयनारायण व्यास विश्वविद्यालयः,<br>जोधपुरम् | १ |
| २. शारीरकमीमांसायां ब्रह्म-कारणवादः-एका समीक्षा | करुणानन्द मुखोपाध्यायः<br>असिस्टेन्ट प्रोफेसर, संस्कृतविभागः,<br>कलासङ्कायः, काशी हिन्दू विश्वविद्यालयः,<br>वाराणसी | ७ |
| ३. अष्टाध्याय्यां समुल्लिखित-नक्षत्राणां समीक्षणात्मकं विवेचनम् | डॉ. सुकुमार चट्टोपाध्यायः<br>असिस्टेन्ट प्रोफेसर, संस्कृतविभागः,<br>कलासङ्कायः, काशी हिन्दू विश्वविद्यालयः,<br>वाराणसी | १७ |
| ४. अर्धनारीश्वरदीक्षितस्य अम्बास्तवव्याख्या दाक्षिणात्य-श्रीविद्यापरम्परायां समयमतस्थानं च | एलेन फिशेर<br>शोधच्छात्रा<br>कोलम्बीया विश्वविद्यालयः,<br>कोलम्बीया | २५ |
| ५. उत्तररामचरिते पर्यावरण-विद्या | श्यामानन्द मिश्रः<br>उपाचार्य, साहित्यविभागः<br>काशी हिन्दू विश्वविद्यालयः,<br>वाराणसी | ३३ |

| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| ६. पाणिनीया 'अधिकार' व्यवस्था | डॉ. देवनाथ त्रिपाठी<br>सहायकप्राध्यापकः,<br>संस्कृतप्रगताध्ययनकेन्द्रम्<br>पुणेविद्यापीठम्, पुणे | ३७ |
| ७. अच्युतरायमोडककृत-साहित्यसारस्य परिचयात्मकं विवरणम् | विमलेन्दु कुमार त्रिपाठी<br>शोधच्छात्रः, संस्कृतविभागः,<br>कलासङ्कायः, काशी हिन्दू विश्वविद्यालयः,<br>वाराणसी | ४३ |




# आर्यशान्तिदेवानुसारं क्षान्त्या समं तपो नास्ति

**डॉ. मङ्गलारामः**

सप्तमशताब्द्याः बौद्धविदुषा आर्यशान्तिदेवेन रचिते बोधिचर्यावतारनामकग्रन्थे बोधिचित्तानुशंसाप्रभृतीनि दश प्रकरणानि श्लोकबद्धलिखितानि। तेषु षष्ठप्रकरणं क्षान्तिपारमिता वर्तते। प्रकरणस्यास्य चतुस्त्रिंशदेकशतं श्लोकेषु ग्रन्थकारेण क्षमामेव सर्वथा ग्राह्यगुणं ब्रुवन् तर्कपूर्वकं क्षमायाः प्रशंसा नैकप्रकारेण कृता।

**द्वेषजन्यदोषाः**

नैकप्रयासैरर्जितानि सदाचरणदानादीनि यानि सत्कर्माणि सन्ति तानि सर्वाणि अन्यजनान्प्रति द्वेषबुद्ध्या नष्टानि भवन्ति। द्वेषबुद्धिवदन्यं किमपि पापं नास्ति क्षमावच्चान्यं किमपि तपो नास्ति अतः व्यक्ति क्षमाभावस्याभ्यासं कुर्यात्। द्वेषरूपकण्टकयुक्तजनस्य मनोऽशान्तं भवति स च जनो धैर्यपूर्वकं कार्यं कर्तुमक्षमो भवति। द्वेषबुद्धिजनाः स्वस्वामिनमपि हत्वा धनसम्मानादिसांसारिकैश्वर्यस्येच्छुकाः भवन्ति। आर्यशान्तिदेवेनोद्घोषणा कृता यद्द्वेषबुद्धिवन्तो जनाः कमपि जनं मित्रं कर्तुं समर्थाः न भवन्ति।

**सुहृदोऽप्युद्विजन्तेऽस्माद्ददाति न च सेव्यते।**
**संक्षेपान्नास्ति तत्किञ्चित्कोपनो येन सुस्थितः॥**[1]

**क्रोधजन्यदोषाः**

क्रोधः शत्रुं भूत्वा जिज्ञासवे दुःखं प्रददाति। यो जनो हठपूर्वकं दुर्गुणममुं दूरमेव धारयति स एव संसारे सुखं प्राप्नोति। अन्येष्टविघाताद् जातस्य मानसिकासन्तोषस्यावलम्बनं प्राप्य अयं दुर्गुणो जिज्ञासुमनवरतं दुःखेन योजयति। तस्माज्जनो नाशाय क्रोधस्येमां प्रतिज्ञां कुर्यात्--

**तस्माद्विघातयिष्यामि तस्याशनमहं रिपोः।**
**यस्मान्न मद्वधादन्यत्कृत्यमस्यास्ति वैरिणः॥**[2]

## दुःखाधिवासनक्षान्तिः

क्षमाभावेन दुःखनाशकरणमेव दुःखाधिवासनक्षान्तिरुच्यते। जनोऽत्यनिष्ट-स्योपस्थित्यामपि मुदितभावनायास्त्यागं न कुर्याद् यतः चित्तगतदुर्भावनया स्वपुण्यहानिर्भवति। अनिष्टस्य प्रतीकारः दौर्मनस्यात्कदापि सम्भवो नास्ति। कोऽपि जनः दुःखापमानापकीर्त्तीनां प्राप्तये चेष्टां न करोति। सुखन्तु अतिकाठिन्याल्लभ्यते किन्तु दुःखन्तु सदा अनायासेनैव उपस्थितं वर्तते अतः दुःखान्नित्यमुक्तौ सत्यामेव जनस्य कल्याणं भवति। दुःखसहनशीलतैव दुःखमुक्तेः प्रथमः उपायः अभ्यासेन दुःखव्यथां सहनशीलतयाः क्षमता आगच्छति। शान्तिदेवेनापि उक्तम्--

**तस्मान्मृदुव्यथाभ्यासात्सोढव्यापि महाव्यथा।**[3]

दैनिकदिनचर्यायां बुभुक्षापिपासाखर्जनप्रभृतयो दुःखदपीडाः अभ्यासादेव सह्यन्ते। ग्रन्थकारेणोक्तं यत् शैत्योष्णतावर्षावायुगमनरोगताडनादिपीडाभ्यः उद्विग्नं भूत्वा शरीरस्य सुकुमारतायामिमाः पीडा अधिकतराः सञ्जायन्ते। चित्तदौर्वल्यहेतोरेव लेशमात्रं शरीरनिर्गतानि रक्तकणानि दृष्ट्वा जनो मूर्च्छितो भवति अतः दुःखानामत्यन्तासह्यकारणान्मुक्तिप्राप्तिरेव श्रेयस्करी। बुद्धिमतः कर्त्तव्यमिदं यत्स सङ्कटकाले स्वचित्तप्रसन्नतां धारयेत् तस्मिन् च विकारागमनं रुन्ध्यात् प्रत्युत स क्लेशैः सहातिभीषणं युद्धं कुर्यात्। यो जनः शत्रुकृतं मर्माघातं सोढ्वा शत्रुं पराजयति स एव वस्तुतः वीरो युद्धविजयी च मन्यते। दुःखसंवेगेन गर्वः खण्डितो भवति। सचेतनप्राणिभ्योऽक्रोधकरणं शान्तिदेवेन एवमबबोधनं कारितम्-

**पित्तादिषु न मे क्रोधो महादुःखकरेष्वापि।**

**सचेतनेषु किं कोपः तेऽपि प्रत्ययकोपिताः।।**[4]

## क्रोधोत्पत्तिहेतवः

यथा शरीरे वातजन्यपीडा अनिच्छयैव जायते तथैव प्राणिषु क्रोधोऽप्यनिच्छयैव सञ्जायते। कोऽपि अपराधः पापं वा स्वहेतुसामग्रयाः जायते। स्वं प्रति शत्रुं मित्रं वा कमप्यन्याय कर्तारं दृष्ट्वा जनः इदं वियारयेद् यदस्येयमेव प्रकृतिः फलतः अयमन्यायं करोति। इत्थं विचारणया मुदितभावना सञ्जायते। स्वेच्छाचारिणोऽपि सर्वाः मनोकामनाः पूर्णाः न भवन्ति तस्तात्स अपि दुःखी एव विद्यते। दुःखविषये शान्तिदेवस्येयम्मान्यता वर्तते--

**न भवेत्कस्यचिद्दुःखं न दुःखं कश्चि दिच्छति।**[5]



## परापकारमर्षणक्षान्तिः

अन्यजनकृतमहितं क्षमाकरणं परापरकारमर्षणक्षान्तिरुच्यते। जनाः क्रोध-नारीकामनादिहेतोः भोजनादिं त्यक्त्वा स्वस्मै दुःखपरम्परामुत्पाद्य शूलादिपापाचारैरात्महत्यां कुर्वन्ति। आत्महन्तारा जनाः यदा क्लिष्टं भूत्वा स्वशरीरमपि नाशयन्ति तर्हि ईदृशाः जनाः अन्यजनानां हननेऽपि क्षणमपि न तिष्ठन्ति। अज्ञानिजनाः अन्यजनेषु उद्विग्नं कुर्वन्ति ज्ञानिजनाश्च अन्यजनेषु प्रसन्नतां कुर्वन्ति यतः सर्वत्र स्वस्वस्वभावानुसारं क्रियाः क्रियन्ते। मृदुस्वभाववन्तः सरलाः प्राणिनः यदि आगन्तुकदोषैः प्रभावितं भूत्वानुचितकार्याणि कुर्वन्ति तर्हि तेषु क्रोधकरणमनुचितमेव यतः दोषास्तु अनुचितकार्यमेव कारयन्ति। जनः द्वेषिणं प्रति क्रोधं न कुर्यादपितु द्वेषं प्रति क्रोधं कुर्यात्। उक्तमपि--

**मुख्यं दण्डादिकं हित्वा प्रेरके यदि कुप्यते।**

**द्वेषेण प्रेरितः सोऽपि द्वेषे द्वेषोऽस्तु मे वरम्।।**[6]

## द्वेषत्यागहेतवः

यदा कोऽपि प्राणि कमपि जनं पीडितं कुर्यात्तर्हि स त प्रति इदं विचारयेद् यद् अहमिमं प्राणिनं पूर्वजन्मनि पीडितमकरोत्तस्मादेवायं प्राणी अस्मिन्काले मां पीडयति। इत्थं विचारणया तं प्राणिनं प्रति जनस्य द्वेषो न्यूनो भवति। सन्तप्तकारिजनः शस्त्रं धृतवान् अहञ्च शरीरम्। इमे शस्त्रशरीरे द्वे अपि दुःखकारिणे स्तः। एवं विचारणया तं प्राणिनं प्रति द्वेषन्यूनता भवति। तृष्णात्यागेनापि द्वैषशैथिल्यं भवति। मामज्ञानिनं दुःखन्तु प्रियं नास्ति किन्तु दुःखहेतु भूतं शरीरं प्रियमस्ति। परिणामतः मम त्रुट्यैव मह्यं दुःखं भवति। एवं विचारेण अपि द्वेषशून्यता भवति। ममापकारिणो मम कर्मभिः प्रेरितं भूत्वा मामपकुर्वन्ति। परिणामतः ते नरकं पतिष्यन्ति यत्रैषां मांसमुच्छिद्य श्वानो भक्षयिष्यन्ति। इत्थं विचारणया द्वेषन्यूनतामुच्छिद्य श्वानो भक्षयिष्यन्ति। इत्थं विचारणया द्वेषन्यूनता भवति। द्वेषन्यूनताविषये एकोऽपर उपायः शान्तिदेवेनैवमभिष्यक्तीकृतः--

**अथ प्रत्यपकारी स्यां तथाप्येते न रक्षिताः।**

**हीयते चापि ये चर्या तस्मान्नष्टास्तपस्विनः।।**[7]

## धर्मनिध्यानक्षान्तिः

धर्मं स्मृत्वा अपराधिनं क्षमाकरणमेव धर्मनिध्यानक्षान्तिरुच्यते। अमूर्तमनसो

मरणमसम्भवम्। शरीरे आसक्तमनसा दुःखानुभूतिर्भवति। अपमानादिभिर्यदा शरीरपीडा न भवति तर्हि चित्तपीडानुभूतिरपि न समीचीना। लाभप्राप्तये बाधकद्वेषाः कमप्यभीष्टाः न सन्ति किन्तु लाभप्राप्तेर्नश्वरत्वात् क्षीणा अवश्यमेव भवति किन्तु पापानि भोगपर्यन्तं जनेन सह निवसन्ति अतः जनो लाभजन्यपापानि त्यजेत्। चिरकालपर्यन्तं जीवितुमिच्छापि व्यर्थेव यतो यो जनोऽधिककालपर्यन्तं जीवनं धारयति स स्वशरीरेणाधिककष्टानि भुङ्क्ते। अल्पजीविने बहुजीविने वा मृत्युदुःखन्तु सममेव भवति। 'अहं लाभेन जीवन् पापक्षयं पुण्यार्जनञ्च कुर्माम्' इति विचारोऽप्यनुचित एव यतो यस्मिन्क्षणे हानिं भविष्यति तदा क्रोधजागरणं भवति क्रोधजागरणे च सति पुण्यक्षयः पापसङ्ग्रहश्च प्रारभ्यते। वस्तुतः इदं शरीरमपुण्यस्मैव साधनमस्ति। उक्तमपि--

**यदर्थमेव जीवामि तदेव यदि नश्यति।**
**किं तेन जीवितेनापि केवलाशुभकारिणा॥[8]**

## क्रोधनिवारणोपायाः

जनः क्रोधं दूरकरणायेदं विचारयेद् यद् यदा कोऽपि निन्दको निन्दन् मामपकरोति अहं च तं प्रति द्वेषं धारयामि तर्हि अहं कस्यचिदन्यस्य निन्दां श्रुत्वा कथं द्वेषं न करोमि? सुधर्मनिन्दकान् प्रत्यपि क्रोधनमनुचितमेव यतो यदा सुधर्मं निन्दया कष्टं नास्ति तर्हि मह्यं कष्टं केन हेतुना? प्राणी कश्चित्काले चेतनपदार्थेन कदाचिच्चाचेतनपदार्थेन पीडां प्राप्नोति। पीडानुभूतिस्तु नित्या प्रक्रिया वर्तते अतः पीडायाः सहनकरणं व्यसनं धारयितव्यं न तु पीडायां क्रोधकरणम्। जनाः मोहं वशीभूत्वा क्रोधमपराधं वा कुर्वन्ति अतः मोहत्याग एव श्रेयस्करो वर्तते। मैत्रीभावनया मुदितस्थितिरेवाक्रोधिनो लक्षणम्। क्रोधाज्जनो नैकवारं नरकाणां कष्टानि अनुभवति। क्षमाभावस्य दुःखं नारकीय-दुःखेभ्योऽतिन्यूनमेव। क्षमाभावेन स्वस्य जगत् श्चोभयोर्दुःखं दूरे भवति। अन्येषां सुखानामपेक्षया संस्तुतीकरणमेव समुचितमस्ति न तु निन्दा यतो जनः स्वार्थाय तु स्तुतिमिच्छति। क्षमाभावविषये दुःखसहिष्णुताविषये च शान्तिदेवः कथयति--

**इदं च ते दृष्टिसुखं निरवद्यं सुखोदयम्।**
**न वारितं च गुणिभिः परावर्जनमुत्तमम्॥[9]**



जनो यदायं विचारयति यदन्यान् सुखप्राप्तिर्वर्तते मह्यं तु नास्ति तदा स स्वसुखैरपि दुःखं धारयति स च कस्मै अपि दानं न ददाति फलतः तस्य दृष्टमदृष्टञ्च उभयोरपि विनाशनं जायते। जगतो विचित्रदशेयमस्ति यज्जनः स्वमाहात्म्यं प्रकटीकृत्वा अन्यजनेषु प्रसन्नतायाः उदभवमिच्छति किन्तु अन्येषां गुणान् श्रुत्वा स्वयं प्रसन्नतानुभूतिं न करोति। प्रायः प्राणिनोऽन्येषां सततसुखेभ्यः ईर्ष्यन्ति। कदाचित्तु जनः परिवारपोषकमग्रपुरुषं प्रति अपि स्वार्थवशतोऽनुचितक्रोधं करोति। यो जनो अन्येषां सम्पत्तीः दृष्ट्वा द्वेषणं धारयति तस्मै सुखप्राप्तिस्तु कदापि न भवति। यदि कश्चिज्जनः कस्मादपि जनाद् धनयाचनां कुर्यात् स च जरो धने सत्यपि न दद्यात्तर्हि जनो इदं विचारयेद् यत्तस्य तद्धनं कदाचित्तु कमप्यन्यं प्राप्तं भविष्यति यत्प्राप्य कश्चित्तु सुखी भविष्यति। एवं विचारणायां तं धनिनं प्रति क्रोधं न कुर्यात्। जनोऽन्येषां शुभकर्मभ्योऽपि ईर्ष्यां न कुर्यादपितु स्वपापानां प्रायश्चित्तं कुर्यात्। स्तुतिसत्कारकीर्त्यादिहेतोः पुण्यार्जनायुवृद्धि-बलवर्धनारोग्यशरीरसुखानां प्राप्तिर्न भवति अपितु जनो द्यूतादिषु दुर्गुणेषु आसक्तिं कृत्वा दुःखी सञ्जायते। अचेतनशब्दैश्चेतनप्राणिनां स्तुतिरसम्भवा। अन्यचेतनप्राणिना कृतः स्नेह एव प्रसन्नतायाः मूलाधारोऽस्ति। अन्येषां सुखानि दृष्ट्वा यत्सुखमुपलभ्यते तदेव यथार्थसुखम्। येऽन्यजनाः स्तुतिविघातं कुर्वन्ति ते एव तज्जनं नरकपाताद्रक्षन्ति। क्षमाव्रतस्य धारणाविषये सम्यगेवोक्तम्--

**पुण्यविघ्नः कृतोऽनेनेत्यत्र कोपो न युज्यते।**
**क्षान्त्या समं तपो नास्ति नन्वेतत्तदुपस्थितम्॥[10]**

❖

**सन्दर्भग्रन्थाः**


1. आर्यशान्तिदेवः, बोधिचर्यावतारः, षष्ठपरिच्छेदः, क्षान्तिपारमिता, कारिका 5, सम्पादकः स्वामी द्वारकादासशास्त्री, प्रकाशनम् - बौद्धभारती, वाराणसी, खिष्टाब्दः 2001

2. तदेव, कारिका 8

3. तदेव, कारिका 14

4. तदेव, कारिका 22

5. तदेव, कारिका 35

6. तदेव, कारिका 41

7. तदेव, कारिका 51

8. तदेव, कारिका 61

9. तदेव, कारिका 77

10. तदेव, कारिका 102


❖



# शारीरकमीमांसायां ब्रह्मकारणवादः--एका समीक्षा


**करुणानन्दः मुखोपाध्यायः**


उपनिषद्वाक्यानां मीमांसार्थं महर्षिव्यासेन ब्रह्मसूत्रं शारीरकमीमांसाऽपरनामधेयं विरचितमस्ति। तत्र ब्रह्मस्वरूपप्रतिपादनाय आचार्यैः जन्माद्यस्य यतः[1] इति सूत्रं विरचितम्। तस्मिन् सूत्रे विद्यमानस्य अस्य इति पदस्य प्रकृतिरूपेण विद्यमानम् इदं पदं जगद्रूपमर्थं प्रतिपादयति। जगत् इत्यनेन प्रत्यक्षादिप्रमाणैरनुभूयमानस्य स्थूलसूक्ष्मोभयात्मकस्य सम्पूर्णब्रह्माण्डस्य ग्रहणं भवति। 'जन्माद्यस्य यतः' इति सूत्रव्याख्यानावसरे आचार्यशंकरेण उक्तम् -"अस्येति प्रत्यक्षादिसन्निधापितस्य धर्मिणः इदमा निर्देशः।" अस्य जगतो नामरूपाभ्यां व्याकृतस्य अनेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकाल--निमित्तक्रियाफलाश्रयस्य मनसाऽप्यचिन्त्यरचनारूपस्य....।"[2]

## 1. अयभभिसन्धिः

प्रत्यक्षानुमानशब्दादिप्रमाणैः अनुभूयमानस्य अनेकविधजीवसमुद्रपर्वतग्रह-नक्षत्रनीहारिकासमन्वितस्य सम्पूर्णब्रह्माण्डस्य ग्रहणं जगत्पदेन भवति। एतादृशब्रह्माण्डं प्रति ब्रह्मैव कारणम् इति ब्रह्मसूत्रस्य रचयितुः अभिप्रायः, "अथातो ब्रह्मजिज्ञासा"[3] इति सूत्रेण ब्रह्म जिज्ञासितव्यं मुमुक्षुणा इत्यभिधाय किंलक्षणं तद् ब्रह्म? इति जिज्ञासायां सत्यां "जन्माद्यस्य यतः" इति द्वितीयसूत्रावतरणात्। आशयस्तु अयं यत् अस्य जगतो जन्मस्थितिभङ्गो यस्माद् कारणाद् भवति तद् ब्रह्म इति जगन्निष्ठकार्यतानिरूपितकारणतावद्ब्रह्म इति सूत्रार्थः पर्यवस्यति।

एतादृशकारणत्वं घटरूचकादीनां प्रति मृत्तिकासुवर्णावदुपादानकारणे कुलालसुवर्ण-कारादिवन्निमित्तिकारणे च समानम् इत्यतो भवति संशयः - किमात्मकं पुनः ब्रह्मणः कारणत्वं स्यात्? किम् उपादानकारणत्वमात्रमस्ति ब्रह्मणः? उत निमित्तकारणत्वमात्रम्? अथवा अभिन्ननिभित्तोपादानकारणत्वमस्ति ब्रह्मणः? एतेषां प्रश्नानां समाधानाय अद्वैतवेदान्तप्रतिपादितां दृष्टिमाश्रित्य अस्माभिः अनुसन्धानं कृतम्। तेन च यत्फलरूपेण प्राप्तं तदत्र प्रस्तूयते।

## 2. ब्रह्माण्डं प्रति ब्रह्म अभिन्ननिमित्तोपादानकारणम्

ब्रह्माण्डं प्रति ब्रह्मण अभिन्ननिमित्तोपादानकारणत्वमस्ति इति वेदान्तडिण्डिमः। तथाहि "स ईक्षांचक्रे"[4] स प्राणमसृजत"[5] इत्यादि श्रुतिम्यः ईक्षापूर्वकं कर्तृत्वं ब्रह्मण अवगम्यते। ईक्षापूर्वककर्तृत्वस्य कुलालादिनिमित्तकारणेषु एव दृष्टत्वात् ब्रह्म ब्रह्माण्डं प्रति निमित्तकारणमिति लभ्यते। किञ्च "उत तमादेशमप्राक्ष्यः। येनाश्रुतं श्रुतं भवति अमतं मतमविज्ञातं विज्ञातमिति।"[6] इति प्रतिज्ञावाक्येन एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञायते, तच्च ब्रह्मणो ब्रह्माण्डं प्रति उपादानकारणत्वे एव सम्भवति, उपादानकारणस्यैव कार्यात्मकत्वात्। एवं "यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् वाचारम्मणं विकारो नामधेयम् मृत्तिकेत्येव सत्यम्"[7] इति दृष्टान्तवाक्येन उपादानकारणव्यतिरेकेण कार्यस्य असत्त्वं विज्ञायते। तस्मान् एतत् प्रतिज्ञादृष्टान्तानुरोधेन ब्रह्मणो ब्रह्माण्डं प्रति उपादानकारणत्वं सिद्ध्यति। एतदभिप्रायेणैव आह भगवान् व्यासदेवः - "प्रकृतिश्च। प्रतिज्ञादृष्टान्तानुपरोधात्"[8] इति। चकारेण ब्रह्माण्डं प्रति ब्रह्म निमित्तकारणमपि अस्ति इति ज्ञायते।

**( 1 ) अभिन्ननिमित्तोपादानकारणत्वे दृष्टान्तप्रदर्शनम्--**कार्यविशेषं प्रति उपादानकारणं निमित्तकारणञ्च भिन्नं भिन्नं दृश्यते, यथा तन्तुवायः तन्तुम्यः पटं निर्माति इत्यत्र पटं प्रति तन्तव उपादानकारणं तन्तुवायश्च निमित्तकारणमस्ति। तदेव कारणम् उपादानकारणमुच्यते, यत्र उत्पत्त्यनन्तरं कार्यं नियमेन सम्बद्धं तिष्ठति, यथा उत्पत्त्यनन्तरं पटः तन्तुषु सदा सम्बद्धस्तिष्ठति, तन्तुसम्बन्धं विहाय पटस्य अस्तित्वं कल्पयितुं न शक्यते, अतस्तन्तवः पटं प्रति उपादानकारणमस्ति। निमित्तकारणं तदस्ति यत् उपादानकारणस्य कार्यरूपप्राप्तये सहायकं भवति, परन्तु कार्योत्पत्त्यनन्तरं निमित्तकारणं कार्यात्पृथगेव तिष्ठति। यथा वाराणस्यां निर्मितं वस्त्रम् अमेरिकादेशं गतं, परन्तु तन्तुवायः वाराणस्यामेव तिष्ठति।

यद्यपि एतादृशरीत्या प्रायशः कार्यं प्रति उपादानकारणं निमित्तकारणञ्च भिन्नं भिन्नं दृश्यते, तथापि कार्यविशेषे उभयकारणम् अभिन्नमपि भवति, यथा नृत्यात्मककार्य प्रति नर्तकः उपादानं निमित्तञ्च भवति। नर्तकः स्वहृदयस्थितं भावं शिल्पकलामाध्यमेन (शिल्पकला च नर्तकस्य अभिन्नाङ्गोऽस्ति) स्वशरीरे तालालयाभ्यां नृत्यरूपेण सृजति, तस्मात् नृत्यात्मकं कार्यं प्रति नर्तकः उपादानं निमित्तञ्चाऽस्ति। तथैव प्रकृते ब्रह्म स्वस्मिन् बीजरूपेण स्थितं ब्रह्माण्डं क्रमविकासप्रक्रियया स्वस्मिन्नेव सृजति,



ब्रह्माण्डस्य उत्पत्तये ब्रह्मणः पृथगुपादानकारणस्य आवश्यकता नास्ति, तस्मात् ब्रह्माण्डं प्रति ब्रह्म उपादानं निमित्तञ्च भवति। एतदेव हेतुर्यत् भारतीयमनीषिणः महाविश्वतत्त्वस्य आदर्शप्रतिरूपरूपेण[9] नटराजशिवं प्रस्तुवन्ति। नटराजशिवः ब्रह्मणः प्रतीकः, तस्य ताण्डवनृत्यं हि जगत्। भारतीयमनीषां विहाय विश्वस्य अन्ये मनीषिणः नृत्यन्तम् ईश्वरम् न कल्पयन्त आसन्, एतदस्ति भारतीयमनीषायाः अनुपमकृतिः।

## 3. ब्रह्मणोऽभिन्ननिमित्तोपादानकारणत्वे पर्यनुयोगाः

अद्वैतवेदान्तानुसारं पूर्णं शान्तम् आनन्दस्वरूपम् अद्वैतं ब्रह्म ब्रह्माण्डस्य अभिन्ननिमित्तोपादानकारणमस्ति। मानवमनसि प्रश्नाः जायन्ते-- (1) आनन्दस्वरूपाद् ब्रह्मणः दुःखपूर्णस्य ब्रह्माण्डस्य उत्पत्तिः कथं सम्भवति? (2) शान्तं पूर्णं ब्रह्म किं निरन्तरगतिशीलतया अशान्तस्य ब्रह्माण्डस्य कारणं भवितुमर्हति? (3) कार्यकारणयोः समानस्वभावस्य सर्वानुभवसिद्धतया जडब्रह्माण्डं प्रति चैतन्यस्वरूपं ब्रह्म कथम् उपादानं स्यात्? (4) ब्रह्म अस्ति आप्तकामः, तत्कथं सः ब्रह्माण्डसृजनात्मके महति कार्ये प्रवृत्तो भवेत्? एतेषु प्रश्नेषु आद्यत्रयं ब्रह्मनिष्ठब्रह्माण्डीयोपादानकारणतां विषयीकृत्य उपजायन्ते, अन्तिमस्तु ब्रह्मणो निमित्तकारणतामाश्रित्य जायते।

## 4. समाधानम्

एतेषु प्रश्नेषु आद्यत्रयस्य समाधानाय चिन्मात्रे ब्रह्मणि एका शक्तिः स्वीक्रियते, यस्याः माया इति नाम अस्ति। एषा मायाशक्तिः ब्रह्मणः स्वात्मभूता अस्ति। तथा च श्रुतिः--"ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्।"[10]

**अयम् अभिसन्धिः--**शुद्धं ब्रह्म न जगदुपादानं किन्तु मायाविशिष्टमेव, तथा हि मायाशक्त्या युक्तः सन् निर्गुणं ब्रह्म सगुणं भवति, सर्वज्ञः सर्वशक्तिमान् च भवति, वृहद् ब्रह्माण्डं स्रष्टुं पालयितुं संहर्तुञ्च समर्थो भवति। इयं माया ब्रह्मणि आश्रिता सति आकाशादिप्रपञ्चाकारेण परिणमते, अतएव ब्रह्माण्डं प्रति माया उपादानकारणमस्ति इति कथ्यते। श्रुतिरपि मायायाः ब्रह्माण्डं प्रति उपादानकारणत्वं प्रतिपादयति--"मायां तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्।"[11] एवं "यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति तद् ब्रह्म तद्विजिज्ञासस्व"[12] इति श्रुत्या ब्रह्मणो जगदुपादानकारणत्वं प्रतिपाद्यते। तथा च ब्रह्माण्डं प्रति उपादान कारणद्वयम् इति साम्प्रतम्।

**( i ) मायायाः ब्रह्माण्डोपादानत्वे युक्तिः**--उपादानकारणं कार्येषु अनुस्यूतं तिष्ठति इत्यस्ति नियमः, दृश्यते च मृत्तिकायाः घटादिषु सुवर्णस्य च कुण्डलादिषु अनुस्यूतत्वम्। ब्रह्माण्डस्वरूपपर्यालोचनया अपि मायायाः उपादानकारणत्वं सिद्ध्यति। तथाहि माया सत्त्वं रजः तमश्चेति त्रिगुणात्मिका जडात्मिका च अस्ति। ब्रह्माण्डीय-सर्वकार्येषु घटपटपर्वतग्रहनक्षत्रनीहारिकादिषु त्रिगुणात्मकत्वं जडत्वञ्च अनुभूयते। "कारणगुणाः कार्यगुणान् आरभते इति नियमात् ब्रह्माण्डीयसर्वकार्येषु विद्यमानं त्रिगुणात्मकत्वं जडत्वञ्च अनुभूय अनुमीयते यत् ब्रह्माण्डात्मकं कार्यं त्रिगुणात्मकेन जडात्मकेन केनचित् उपादानकारणेन भवितव्यम् इति त्रिगुणात्मिकाया जडस्वरूपायाश्च मायायाः उपादानकारणत्वं लभ्यते।

**( ii ) ब्रह्मणो ब्रह्माण्डोपादानत्वे युक्तिः**--'मृत्तिका अस्ति', 'पृथ्वी अस्ति', 'सूर्योऽस्ति', 'मनुष्योऽस्ति', 'आकाशोऽस्ति', 'प्रकाशोऽस्ति', 'नीहारिकाऽस्ति' इत्यादिभिः अबाधितप्रतीतिभिः सम्पूर्णेऽपि ब्रह्माण्डे समानरूपेण अस्तित्वं विद्यते इति प्रतिभाति। एतदर्थं ब्रह्माण्डस्य कृते कस्यापि एवंविधस्य उपादानकारणस्य आवश्यकता अस्ति यो सम्पूर्णब्रह्माण्डम् अस्तित्वं प्रदातुं शक्नोति। एतादृशम् उपादानकारणं ब्रह्मैव भवितुम् अर्हति। यतो हि ब्रह्मण एव अनन्तं शाश्वतम् अस्तित्वम् अस्ति। पारमार्थिकदृष्ट्या मायाया अस्तित्वमेव नास्ति, "भूयश्चान्ते विश्वमायानिवृत्तिः"[13] इति श्रुतेः। श्रुतिस्थनिवृत्तिपदेन बाधो विवक्ष्यते न तु कारणे लयात्मको नाशः, मायायाः कारणरहितत्वात्। मायायाः कारणरहितत्वे "अजाम् एकां लोहितशुक्लकृष्ण-वर्णाम्"[14] इति श्रुतिर्मानम्। "अज्ञानकल्पितस्यैव बाधो भवति" इति नियमस्य रज्जुसर्पशुक्तिरजतमृज्जलादिषु सर्वत्र अव्यभिचरितत्वात् मायायाः अपि अज्ञानकल्पितत्वं लभते। प्रसङ्गतः एकः प्रश्नः समुदेति मानवमनसि यत् अद्वैतवेदान्ते मायाया एव अज्ञानमस्ति नामान्तरम्, तर्हि मायायाः अज्ञानकल्पितत्वं कथं घटते? आशयस्त्वयं यत् सम्पूर्णप्रपञ्चस्य कल्पनां माया करोति परन्तु मायायाः स्वकल्पनं कथं घटते? अत्र समाधानमिदमस्ति यत् एतन्न विरुद्धम्। तथाहि यथा ज्ञानं घटादिविषयं प्रकाशयति सहैव स्वमपि प्रकाशयति तथैव अज्ञानं ब्रह्मणि सम्पूर्णप्रपञ्चं कल्पयति सहैव स्वमपि कल्पयति इति न कश्चित् विरोधः। उक्तञ्चैतत् सर्वज्ञात्ममुनिना--

**संविद् धुरं वहति तद्विषयोपयुक्ता**

**स्वात्मन्यपि स्वरसतः स्वकरूपसिद्धेः।**



**कार्यप्रपञ्चपरिकल्पनमात्ममोहात्**

**मोहप्रकल्पनमपीति तथोपपन्नम्।।**[15]

एतच्छलोकव्याख्यानावसरे आचार्यमधुसूदनसरस्वतीना उक्तम् --"एवमज्ञानादेव प्रपञ्चकल्पनमज्ञानकल्पनं चोपपन्नम्।"[16] या स्वयम् अज्ञानकल्पिता तस्याः ब्रह्माण्डस्य कृते उपादानरूपेण अस्तित्वप्रदातृत्वं कथमपि न सम्भवति इति अस्तित्वस्वरूपाद् ब्रह्मण एव ब्रह्माण्डम् अस्तित्वं लभते इति युक्तिसहकृतानुभवेन श्रुत्या च ब्रह्मण अपि उपादानकारणत्वं प्राप्तम्। तथा च ब्रह्माण्डं प्रति माया ब्रह्म च उपादानकारणमिति साम्प्रतम्। इदानीं प्रश्नो जायते यत् किं मायायाः ब्रह्मणश्च स्वतन्त्ररूपेण ब्रह्माण्डं प्रति उपादानकारणत्वम् अस्ति?

**( iii ) मायाविशिष्टं ब्रह्म जगदुपादानम्**--अस्य प्रश्नस्य समाधानमेवमस्ति-माया ब्रह्म च निरपेक्षरूपेण ब्रह्माण्डं प्रति कारणं भवितुं नार्हति, यतो हि यत्र कारणद्वयं मिलितरूपेण एकमेव कार्यं जनयति तत्र उभयोः कारणयोः परस्परम् अपेक्षा वर्तते। प्रकृतेऽपि मायायां ब्रह्मणि च परस्परम् अपेक्षा विद्यते ब्रह्माण्डजननाय इति स्वीकरणीयम् अस्ति। आचार्यप्रकाशात्मयतिना एतत्स्पष्टम् अभिहितम्--"निरपेक्षप्रकृतिद्वयानुपपत्तिरिति चेत् तर्हि परस्परविशिष्टतयाद्विसूत्ररज्जुवत्प्रकृतिता स्यात्।"[17]

भवतु नाम मायाब्रह्मणोः परस्परापेक्षा, परन्तु परस्परम् अपेक्षा तत्रैव अङ्गीक्रियते यत्र उभयोः कारणयोः स्वतन्त्रम् अस्तित्वं स्यात् यथा सूत्रद्वयं परस्परं मिलित्वा एकमेव रज्जुं निर्माति। प्रकृते तु--ब्रह्मणः स्वतन्त्रम् अस्तित्वं विद्यते, परन्तु मायायाः स्वतन्त्रम् अस्तित्वं नास्ति। सा तु ब्रह्माणि आश्रिता सति ब्रह्मण्येव ब्रह्माण्डं रचयति। तस्मात् ब्रह्मणः ब्रह्माण्डं प्रति मुख्योपादानकारणता मायायाश्च द्वारकारणता एव अभ्युपगन्तव्या। "जन्माद्यस्य यतः" इति सूत्रव्याख्यानवेलायाम् आचार्यपद्मपादः लिखति--"अतो यदवष्टम्भो विश्वो विवर्तते प्रपञ्चः, तदेव मूलकारणं ब्रह्मेति[18] सूत्रार्थः।" यस्य साहाय्येन सम्पूर्णविश्वप्रपञ्चो विवर्तते सम्पूर्णविश्वप्रपञ्च यस्य विवर्तः, तद् ब्रह्म एव मूलकारणम् इत्याशयः।

एतदुक्तं भवति--द्विविधं हि उपादानकारणं प्रसिद्धं वर्तते जगत्यस्मिन्, प्रथमंस्तावत् परिणाम्युपादानकारणं द्वितीयञ्च विवर्त्तोपादानकारणमिति। यत्र कारणं स्वीयं पूर्वरूपं परित्यजन् सत्यरूपान्तरं प्राप्नोति तत् परिणाम्युपादानकारणमस्ति, यथा मृत्तिका पूर्वपिण्डरूपं परित्यज्य घटरूपं प्राप्नोति, तस्मात् घटं प्रति मृत्तिका परिणाम्युपादान-

कारणमस्ति, घटश्च मृत्तिकायाः परिणाम इति। पक्षान्तरे यत्र कारणं स्वीय स्वरूपात् विन्दुमात्रमपि विच्युतिं विनैव पूर्वरूपविपरीतरूपेण प्रतीयते तत्कारणं विवर्त्तोपादानकारणमुच्यते। यथा शुक्तिका स्वस्वरूपात् विच्युतिं विनैव रजतरूपेण प्रतीयते भ्रान्तिस्थले, तस्मात् रजतं प्रति शुक्तिका अस्ति विवर्त्तोपादानकारणम्, रजतञ्च शुक्तिकायाः विवर्त इति। उक्तञ्चैतत् प्रकाशात्मयतिना--''एकस्य तत्त्वादप्रच्युतस्य पूर्वविपरीताऽसत्यानेकरूपावभासो विवर्त्तः। एकस्य पूर्वरूपपरित्यागेन सत्यरूपान्तरापत्तिः परिणामः।''

विवर्त्तस्थले सर्वत्र कार्योत्पत्तये द्विविधमपि उपादानकारणं स्वस्वव्यापारेण संयुक्तं भवति। तथाहि इदं रजतमित्यादिभ्रमस्थले अनिर्वचनीयरजतोत्पत्तिवेलायां शुक्तित्वप्रकारिकाया अविद्याया रजतरूपेण परिणामो भवति इत्यतः शुक्तित्वप्रकाशिका अविद्या रजतं प्रतिपरिणाम्युपादानकारणमस्ति, तत्रैव अधिष्ठानरूपेण शुक्तिका शुक्त्यवच्छिन्नचैतन्यं[20] वा तिष्ठति, तत्सत्ता एव रजतसत्तारूपेण प्रतीयते, अतः शुक्तिः शुक्त्यवच्छिन्नचैतन्यं वा रजतं प्रति विवर्त्तोपादानकारणम्।

प्रकृते च सृष्टेः प्राक् ब्रह्मणि आश्रिता माया सत्त्वादिगुणानां साम्यावस्थारूपेण तिष्ठति, सृष्टेः प्रारम्भिकक्षणे गुणानां साम्यावस्था भंगा भवति तेन च त्रिगुणात्मिकायाः मायायाः आकाशदिप्रपञ्चाकारेण परिणामो भवति इत्यतः ब्रह्माण्डं प्रति माया परिणाम्युपादानकारणमस्ति, ब्रह्माण्डश्च मायायाः परिणामाः। तत्रैव अधिष्ठानरूपेण ब्रह्म तिष्ठति, ब्रह्मणः सत्ता एव ब्रह्माण्डसत्तरूपेण प्रतीयते। वस्तुतः स्वस्वरूपं विच्युतिं विनैव ब्रह्म ब्रह्माण्डरूपेण भासते, तस्मात् ब्रह्म ब्रह्माण्डं प्रति विवर्त्तोपादानकारणमस्ति, ब्रह्माण्डश्च ब्रह्मणो विवर्त्तः इति।

एतावता सिद्धं भवति--ब्रह्माण्डं प्रति ब्रह्म विवर्त्तोपादानमस्ति, माया च परिणाम्युपादानकारणमिति। एतयो कारणयोः कस्य मुख्यकारणत्वमस्ति? ब्रह्मणि आश्रिताया मूलाविद्यायाः विश्वप्रपञ्चाकारेण परिणामो भवति, तत्र ब्रह्मैव विश्वप्रपञ्चाकारेण भासते इत्यतः विवर्त्तोपादानस्य ब्रह्मण एव मुख्यकारणत्वम् अंगीकरणीयम् मायायाश्च द्वारकारणतामात्रम्। माया ब्रह्माण्डस्य स्वपरिणामात्मकस्य कार्यस्य कृते नामरूपे एव प्रदातुं शक्नोति, परन्तु अस्तित्वं सत्तास्फुरणञ्च ब्रह्मण एव ब्रह्माण्डः प्राप्नोति। किञ्च माया न ब्रह्मणो भिन्ना अपि तु ब्रह्मणः स्वात्मभूता शक्तिरस्ति। ''तदधीनत्वात्''[21] इतिसूत्रव्याख्यानवेलायाम् आद्यशंकराचार्येण उक्तम्--''परमेश्वराधीना त्वियम् अस्माभिः



प्रागवस्था जगतोऽभ्युपगम्यते न स्वतन्त्रा। सा च अवश्याभ्युपगन्तव्या। अर्थवती हि सा। न हि तया विना परमेश्वरस्य स्रष्टृत्वं सिद्ध्यति। शक्तिरहितस्य तस्य प्रवृत्त्यनुपपत्तेः।''[22]

उपर्युक्तया आलोचनया इदं स्पष्टं भवति यत् ब्रह्माण्डं प्रति मायाब्रह्मणोः परिणाम्युपादान--विवर्त्तोपादानकारणयोः समानरूपेण कारणत्वेऽपि ब्रह्मणो विवर्त्तोपादानकारणस्य प्रामुख्यं विद्यते, एवं शक्तिशक्तिमतोरभेदस्वीकारात् एकमेव मायाशक्तिविशिष्टं ब्रह्म ब्रह्माण्डस्य अभिन्ननिमित्तोपादानकारणमस्ति। एतदभिहितं प्रकाशात्मयतिना--''तस्माद् अनिर्वचनीयमायाविशिष्टं कारणं ब्रह्मेति प्राप्तम्।''[23]

### अयमभिसन्धिः

शुद्धं ब्रह्म न जगत्कारणम् अपि तु मायाविशिष्टमेव ब्रह्म जगत्कारणम्। ब्रह्मनिष्ठजगत्कारणतायां जायमानेषु पूर्वोक्तपर्यनुयोगचतुष्टयेषु आद्यत्रयाणां समाधानाय ब्रह्मणि मायाशक्तिरङ्गीकृता अद्वैतवेदान्तिभिः, तेन पूर्वोक्तानि असामञ्जस्यानि तिरोहितानि भवन्ति। तथाहि ब्रह्माण्डे ये जडतागतिशीलतादुःखात्मकताऽपूर्णतादयः दृश्यन्ते तान् प्रति परमात्मनः शक्तिभूता त्रिगुणात्मिका जडात्मिका च माया हेतुरस्ति। एवं ब्रह्माण्डेषु ये अस्तिताप्रकाशशीलताऽऽनन्ददायकताचेतनादयः अनुभूयन्ते तान् प्रति ब्रह्म एव उत्तरदायी अस्ति इति सर्वमनवद्यम्।

ब्रह्मणो निमित्तकारणतामाश्रित्य यः प्रश्नोऽजायत--ब्रह्म अस्ति आप्तकामः, तस्य काऽपि कामना नास्ति, अस्यां परिस्थितौ परमेश्वरः कथं ब्रह्माण्डं सृजति? आशयस्त्वयम् - ब्रह्म अस्ति चेतनः। अस्मिन् लोके बुद्धिपूर्वकारी प्रवर्तमानः चेतनः पुरुषः आत्मप्रयोजनानुपयोगिनीं मन्दोपक्रमाम् अपि प्रवृत्तिम् आरभमानो नैव दृष्टः। किमुत गुरुतरसंरम्भाम्? गुरुतरसंरम्भा हि परमेश्वरस्य इयं प्रवृत्तिः उच्चावचप्रपञ्चात्मकब्रह्माण्डसंरचनाविषयिणी। यदि चेतनस्य परमात्मनः आत्मप्रयोजनोपयोगिनी इयं प्रवृत्तिरिति परिकल्प्येत तर्हि परमात्मनः परितृप्तत्वप्रतिपादिनी श्रुतिः बाध्येत। नास्ति प्रयोजनं चेत् तर्हि परमात्मनः जगत्संरचनाविषयिणी प्रवृत्तिर्न स्यात्। आत्मप्रयोजनाभावेऽपि परमेश्वरस्य ब्रह्माण्डरचनाविषयकप्रवृत्तिस्वीकारे उन्मत्तप्रवृत्तिवत् सा प्रवृत्तिरापद्येत तथा सति परमात्मनः सर्वज्ञत्वप्रतिपादिनी श्रुतिःपीड्येत। अर्थात् परमात्मनः ब्रह्माण्डसृष्टिविषयिणी प्रवृत्तिः कथमपि न सम्भवति इति

चतुर्थपर्यनुयोगस्य अन्तर्लीनरहस्यम्। एतत्प्रश्नस्य समाधानाय महर्षिव्यासेन उक्तम्- "लोकवत्तु लीलाकैवल्यम्"[24] अर्थात् यथा लोके आप्तैषणस्य कस्यचित् राज्ञः राजामात्यस्य वा लीलातिरिक्तं किंचित् प्रयोजनमनभिसंधाय क्रीडाविहारादिषु केवलं लीलारूपाः प्रवृत्तयः दृश्यन्ते, तथैव परमेश्वरस्य किंचित् प्रयोजनान्तरम् अनपेक्ष्य केवलं लीलारूपा प्रवृत्तिर्भवति इत्यवधेयम्। इदमत्रावधातव्यं यत् "लीलाविलास-क्रिययोः"[25] इति कोषवचनाद लीलाशब्दस्य क्रियाविलासश्च इति अर्थद्वयं प्राप्यते। पुनः विलासश्च द्विविधः, प्रथमस्तावत् उद्यानविहारादिरूपः विलासः, तस्मिन् तृप्तिलाभादिरूपं किञ्चित् प्रयोजनं विद्यते। सुखोद्रेकात् जायमानः हास्यादिरूपः, दुःखोद्रेकात् जायमानः अश्रुमोचनादिरूपो वा विलासः द्वितीयः, तस्मिन् किञ्चिदपि प्रयोजनं न विद्यते। प्रकृते च परमेश्वरस्य इयं सृष्टिरूपा लीला द्वितीयविलासरूपा बोध्या, तेन परमेश्वरस्य सृष्टिरूपायां लीलायां किंचिदपि प्रयोजनं नास्ति इति ध्येयम्। एतदभिप्रायेणैव आद्यशंकराचार्येण उक्तम् --"यथा लोके कस्यचित् आप्तैषणस्य राज्ञः राजामात्यस्य वा व्यतिरिक्तं किंचित् प्रयोजनमनभिसंधाय केवलं लीलारूपाः प्रवृत्तयः क्रीडाविहारेषु भवन्ति।..... एवम् ईश्वरस्यापि अनपेक्ष्य किंचित् प्रयोजनान्तरं..... केवलं लीलारूपा प्रवृत्तिर्भविष्यति।"[26] एतद्भाष्यव्याख्यानवेलायां ब्रह्मविद्याभरणकारेण उक्तम्--"केवलशब्देन सप्रयोजनविलासो निराक्रियते।"[27] तस्मादिदं सिद्धम् यत् परमेश्वरस्य इयं सृष्टिरूपा प्रवृत्तिः निष्प्रयोजनविलासात्मिका लीला एव।

किञ्च यथा बाह्यं किंचित् प्रयोजनमनभिसंधाय जीवानां श्वासप्रश्वासादयः स्वभावादेव सम्भवन्ति तथैव परमेश्वरस्य इयं ब्रह्माण्डसृष्टिविषयिणी प्रवृत्तिः स्वभावादेव[28] भवति। ब्रह्माण्डसृष्टिविषये परमेश्वरस्य स्वभावातिरिक्तं किमपि प्रयोजनं युक्तितः श्रुतितो वा निरुप्यमानं न सम्भवति। स्वभावस्य उपरि पर्यनुयोगोऽपि न सम्भवति। लोकेऽपि यदि कश्चनः पुरुषः प्रयोजनं विनैव पुनः पुनः अन्यानाम् उपकारम् अपकारं वा करोति, तर्हि जनाः कथयन्ति अस्य अयं स्वभावः इति। तथैव नित्यतृप्तः परमेश्वरः प्रयोजनं विनैव यदि पुनः पुनः ब्रह्माण्डसृष्टिरूपां लीलां करोति तर्हि तदपि तस्य स्वभाव एव इति वक्तव्यम्। आचार्यगौडपादेन एतदभिहितम् -- "देवस्यैव स्वभावोऽयमाप्तकामस्य का स्पृहा।"[29] यद्यपि अस्माकं कृते इयं ब्रह्माण्डसृष्टिः गुरुतरसंरम्भा इति प्रतीयते, तथापि अपरिमितशक्तिमतः परमेश्वरस्य



कृते इयं ब्रह्माण्डसृष्टि अतीवसरला लीला एव केवला। "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति तद् ब्रह्म"[30] इति सृष्टिश्रुतिना "यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः" इत्यादिसर्वज्ञत्वश्रुतिना च परमेश्वरस्य इयं प्रवृत्तिः उन्मत्तप्रवृत्तिः इत्यपि वक्तुं न शक्यते।

तथा च ब्रह्मणो ब्रह्माण्डं प्रति निमित्तकारणतायां सिद्धायां ब्रह्म ब्रह्माण्डं प्रति अस्ति अभिन्ननिमित्तोपादानकारणमिति उपपन्नम्।

❖

## सन्दर्भग्रन्थाः

1. ब्रह्मसूत्रम्, 1/1/2
2. ब्रह्मसूत्रशाङ्करभाष्य, 1/1/2
3. ब्रह्मसूत्रम्, 1/1/1
4. प्रश्नोपनिषत्, 6/3
5. तदैव, 6/4
6. छान्दोग्योपनिषत्, 6/1/2
7. तदैव, 6/1/4
8. ब्रह्मसूत्रम्, 1/4/23
9. आदर्शप्रतिरूप Standard model
10. श्वेताश्वतरोपनिषत्, 1/3
11. तदैव, 4/10
12. तैत्तिरीयोपनिषत्, 3/1
13. श्वेताश्वतरोपनिषत्, 1/10
14. तदैव, 4/5
15. संक्षेपशारीरकम्, 1/53
16. सारसंग्रह, संक्षेपशारीरकटीका, 1/53

17. पञ्चपादिकाविवरणम्, पृ.530-531

18. पञ्चपादिका, पृ.532

19. पञ्चपादिकाविवरणम्, पृ.532

20. वाचस्पतिमतानुसारेण शुक्तिका रजदधिष्ठानं, सर्वत्रचैतन्यमेव अधिष्ठानमिति विवरणमतानुसारेण शुक्त्यवच्छिन्नं चैतन्यं रजदधिष्ठानामिति।

21. ब्रह्मसूत्रम्, 1/4/3

22. ब्रह्मसूत्रशाङ्करभाष्यम्, 1/4/3

23. पञ्चपादिकाविवरणम्, 532

24. ब्रह्मसूत्रम्, 2/1/33

25. अमरकोष, नानार्थवर्ग

26. ब्रह्मसूत्रशाङ्करभाष्यम्, 2/1/33

27. ब्रह्मविद्याभरणः, ब्रह्मसूत्रशाङ्करभाष्यटीका, 2/1/33

28. दृष्टान्ते स्वभावो देहस्य प्राणादिमत्त्वं दार्ष्टान्तिके तु स्वभावोऽविद्या इति द्रष्टव्यम् ....... न्यायनिर्णयः आनन्दगिरिकृतब्रह्मसूत्रशाङ्करभाष्यटीका, 2/1/33

29. माण्डुक्यकारिका, 1/9

30. तैत्तिरीयोपनिषत्, 3/1

31. मुण्डकोपनिषत्, 1/1/9

❖



# अष्टाध्याय्यां समुल्लिखितनक्षत्राणां समीक्षणात्मकं विवेचनम्

डॉ.सुकुमार चट्टोपाध्यायः

भारतीयवाङ्मयस्य सूक्ष्मेक्षिकात्मकं वैशिष्ट्यमेकं सर्वत्रैव उपलभ्यते, तदस्ति सर्वेषां भारतीय शास्त्रसमूहानां अन्तःसम्बन्धः। बीजरूपेण यत कथ्यते--सर्वं सर्वात्मकम्। 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च--इत्युक्तेः मुख्योद्देश्यस्तु भारतीय शास्त्राणां पारस्परिक मेलबन्धनम्। वैदिकसाहित्ये समुल्लिखित विषयाणां ज्ञानवृद्ध्यर्थं तत्सहायकं वेदाङ्गादिग्रन्थानां ज्ञानमतीवावश्यकीयम्। तत्रापि परस्परं वेदाङ्गानामन्तःसम्बन्धः स्पष्टतया दृश्यते।

शब्दार्थज्ञाने शब्दस्य प्रकृतिप्रत्ययादिविषयकं ज्ञानमावश्यकम्। पदस्वरूपज्ञानसहितं तदर्थनिश्चयात्मकं शास्त्रं व्याकरणम्। तर्हि ज्योतिषशास्त्रस्य नक्षत्रविषयकं ज्ञानमपि व्याकरणशास्त्रनिर्भरं भवति। ज्योतिषवेदाङ्गस्य प्रयोजनविषये वेदाङ्गज्योतिषग्रन्थेऽभिहितम्- 'यज्ञकालार्थसिद्धये।' कालविशेषानवगमयितुं ज्योतिषस्योपयोगिता सर्वत्र स्वीकृतः।

जगतः जङ्गमशीलत्वात् सर्वत्र गतिमयत्वं स्थिति दृश्यते। तद्गतेर्परिज्ञानार्थं ग्रहनक्षत्रादीनां परिज्ञानमत्यावश्यकीयम् इति विद्वद्भिः स्वीक्रियते। नक्षत्रविधि प्रसङ्गे तैत्तिरीयब्राह्मणे उक्तम्--'कृत्तिकास्वग्निमादधीत।'[1] अथर्ववेदसंहितायां गार्ग्य--ऋषिदृष्ट सूक्तद्वये (XIX.7 तथा XIX.8) राशिचक्रस्थितनक्षत्राणि देवतारूपेण स्तूयते।

**चित्राणि साकं दिवि रोचनानि सरीसृपाणि भुवने जवानि।**
**तुर्मिशं सुमतिमिच्छमानो अहानि गीर्भिः सपर्यामि नाकम्।।**
**सुहवमग्ने कृत्तिका रोहिणी चास्तु भद्रं मृगशिरः शमार्द्रा।**
**पुनर्वसू सूनृता चारु पुष्यो भानुरश्लेषा अयनं मघा मे।।**
**पुण्यं पूर्वा फल्गुन्यौ चात्र हस्तश्चित्रा शिवा स्वाति सुखो मे अस्तु।**

राधे विशाखे सुहवानुराधा ज्येष्ठा सुनक्षत्रमरिष्ट मूलम्॥
अन्नं पूर्वा रासतां मे अषाढा ऊर्जं देव्युत्तरा आ वहन्तु।
अभिजिन्मे रासतां पुण्यमेव श्रवणः श्रविष्ठाः कुर्वतां सुपुष्टिम्॥
आ मे महच्छतभिषग् वरीय आ मे द्वया प्रोष्ठपदा सुशर्म।
आ रेवती चाश्वयुजौ भगं म आ मे रयिं भरण्य आ वहन्तु॥[2]

पुनश्च--

यानि नक्षत्राणि दिव्यन्तरिक्षे अप्सु भूमौ यानि नगेषु दिक्षु।
प्रकल्पयँश्चन्द्रमा यान्येति सर्वाणि ममैतानि शिवानि सन्तु॥
अष्टाविंशनि शिवानि शग्मानि सह योगं भजन्तु मे।[3]

यद्यपि संहितायां ग्रहनक्षत्रादीनां समुल्लेख अस्ति तथापि तत्सहायकरूपेण तत्परवर्ती वेदाङ्गशास्त्रेष्वपि नक्षत्रज्ञानस्य पल्लवनं दृश्यते। छान्दोग्योपनिषदि (VII.1.2) नक्षत्रविद्या विज्ञानरूपेणाद्रियते--'ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं ... भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवयजनविद्यामेतद्भगवोऽध्येमि।[4] तत्र शाङ्करभाष्ये 'नक्षत्रविद्यां ज्यौतिषम्'--इति स्पष्टीक्रियते। पाणिनीयशिक्षायाम् उक्तम्--'ज्योतिषामयनं चक्षुः।' दर्शनेन्द्रियस्याभावे यथा मनुष्यः किमपि द्रष्टुं न शक्नोति तथैव ज्योतिषशास्त्रस्य ज्ञानाभावे वैदिकशास्त्राणां ज्ञानमसम्पूर्णम् भवति। यथा ज्योतिषं समग्र वैदिकवाङ्मयस्य चक्षुर्भूत तद्वदेव व्याकरणशास्त्रमपि सर्वशास्त्रस्य पार्षदत्वात् सर्वज्ञानस्य महाकोशरूपेण ज्ञायते। व्याकरणेन सह कस्यापि शास्त्रस्य विभेदो नास्ति।

महर्षिपाणिनिः ज्योतिषशास्त्रस्य विशेषतः नक्षत्रविद्यायाः यत् विचारं प्रतिपादितं तदपरिहार्यतया परिपूरकरूपेण ज्योतिर्विज्ञाने ग्रहणीयम्। शब्दस्वरूपज्ञाने व्याकरणशास्त्रस्यापरिहार्यत्वं सर्वत्रैव स्वीकृतम्। शब्दसाधनप्रक्रियामाध्यमेन तच्छब्दाभिधेय वस्तुस्वरूपस्य सम्यक् ज्ञानमपि सम्भवति। मुख्यतया पाणिनि शब्दसाधनदृष्ट्या अध्याध्यायी रचितवान्। तत्र नक्षत्राणां समुल्लेखः ज्योतिर्विज्ञानक्रमेन न दृश्यते। राशिचक्रे प्रधानतः सप्तविंशतिसंख्यकानि दिव्यानि नक्षत्राणि सन्ति। अभिजित् नक्षत्रस्य ग्रहणेन ते अष्टाविंशतिसंख्यकानि भवन्ति। विषयेऽस्मिन् पाणिनि अष्टाध्याय्यां साकल्येन पश्चविंशतिसंख्यकानि सूत्राणि उपस्थापयति। नक्षत्रघटितानि यानि सूत्राणि सन्ति विशेषतया अध्ययनार्थमेकत्रीकृत्य निबन्धेऽस्मिन् विचार्यते।



आदौ नक्षत्रशब्दस्य व्युत्पत्ति अपेक्षते। यास्काचार्येण निरुक्तग्रन्थे उक्तम्-'नक्षत्राणि नक्षतेर्गतिकर्मणः। नेमानि क्षत्राणीति च ब्राह्मणम्।'[5] दुर्गाचार्येण तत् परिष्क्रियते--'एतानि हि नित्यमेव गच्छन्ति' अथवा नेमानि क्षत्राणि धनानि। क्षत्रमिति धननाम (निघण्टु II.9.9) किं तर्हि? धनसरूपाण्येतानि सूर्यरश्म्यनुवेधादस्मयानि सन्ति। हिरण्मयानीव भ्राजन्ते--इति तु ब्राह्मणम्। व्युत्पत्तिद्वयस्य निष्कर्षस्तु सम्भवत एवम्--यत्र नक्षत्रशब्दस्य निर्वचनं गत्यर्थको 'नक्ष' धातोः निष्पन्नं तत्र गणितज्योतिषविषयस्य प्राधान्यम्, किन्तु यत्र लोकनिरुक्तिमवलम्ब्य 'न क्षत्रम्' इति क्रियते तत्र फलितज्योतिषविषयस्य प्राधान्यं सूच्यते। क्षत्र शब्दस्य धनार्थत्वात् नक्षत्रमात्रस्य शुभाशुभफलद्योतकत्वं सिद्ध्यति।

यद्यपि वैदिकसंहितायां कृत्तिकादि--भरण्यन्तं सप्तविंशति/अष्टाविंशतिर्वा नक्षत्राणां परिगणनमासीत् किन्तु वर्तमान ज्योतिषशास्त्रे अश्विनीनक्षत्रादारभ्य रेवतीपर्यन्तं मेषादि द्वादशराशिमध्ये क्रमिकसंस्थापनं दृश्यते। अधुना ज्योतिर्विज्ञानुसारी मेषादि राशिचक्रस्थितक्रमानुसारमश्विन्यादि (अश्वयुजादि) नक्षत्राणां समुल्लेखः अष्टाध्याय्यां यथा दृश्यते तत् सूत्रसंख्यासहितोपस्थाप्यते। सूत्रमध्ये यत्र नक्षत्रस्य स्पष्टोल्लेखः नास्ति तत्र काशिकाग्रन्थात् नीतः। वार्तिकसूत्रमापि द्रष्टव्यम्।

| नक्षत्रनामानि | अष्टाध्याय्याम् |
|---|---|
| 1. अश्वयुज्/अश्विनी/अश्वत्थ | IV.2.5; IV.3.36 |
| 2. भरणी | IV.3.37 |
| 3. कृत्तिका | IV.2.23 |
| 4. रोहिणी | IV.3.37; VII.3.100 |
| 5. मृगशिरा | IV.3.37 |
| 6. आर्द्रा | IV.3.28 |
| 7. पुनर्वसु | I.2.61; I.2.63; IV.3.34 |
| 8. पुष्या/तिष्य | III.1.116;IV.3.34; IV.4.149 |
| 9. अश्लेषा | नोपलभ्यते। |
| 10. मघा | II.3.45 |
| 11. पूर्वफल्गुनी | IV.2.23 |

12. उत्तरफल्गुनी I.2.60; IV.3.34

13. हस्ता IV.3.34

14. चित्रा IV.2.23

15. स्वाती IV.3.34

16. विशाखा I.2.62; IV.3.34; V.1.110

17. अनुराधा IV.3.34

18. ज्येष्ठा - आदौ ज्येष्ठानक्षत्रं रोहिणीनाम्ना ज्ञायते।

यथा तैत्तिरीय संहितायाम्-अनुराधा..रोहिणी नक्षत्रम्।।[6]

19. मूला IV.3.28

20. पूर्वाषाढा IV.3.34

21. उत्तराषाढा IV.3.34

22. श्रवणा/श्रोणा IV.2.5; IV.2.23

23. धनिष्ठा/श्रविष्ठा IV.3.34

24. शतभिषा IV.3.36

25. पूर्वभाद्रपद I.2.60; VII.3.18; V.4.120

26. उत्तरभाद्रपद IV.2.35

27. रेवती IV.4.122; IV.3.34

28. अभिजित् IV.3.36

अधुना अष्टाध्यायीक्रममवलम्ब्य सूत्राणि विचार्यते। प्रथमाध्याये नक्षत्रविषयकसूत्रचतुष्टयस्यैकत्रोपस्थापनं दृश्यते।

**I.2.60 फल्गुनीप्रोष्ठपदानां च नक्षत्रे**--अस्यार्थः ज्योतिषशास्त्रानुसारं द्वयो फल्गुन्यः, पूर्वफल्गुनी एवमुत्तरफल्गुनी तथा द्वयोः प्रोष्ठपदयोश्च नक्षत्रयोः विकल्पेन बहुवचनं भवति। फल्गुन्यौ द्वे नक्षत्रे, प्रोष्ठपदे अपि द्वे, तर्हि युग्मकत्वात् तत्र द्वित्वविवक्षायां द्वयोर्द्विवचनं प्राप्तं किन्तु बहुवचनमन्यतरस्यां विधीयते। यथा--उदिताः पूर्वाः फल्गुन्यः--अत्र बहुवचनम् किन्तु उदिते पूर्वे फल्गुन्यौ--अत्र द्विवचनम्।



**I.2.61 छन्दसि पुनर्वस्वोरेकवचनम्**--छन्दसि विषये पुनर्वस्वोः नक्षत्रयोः द्वित्वे विकल्पेनैकवचनं भवति। स्पष्टतः दृश्यते नभोमण्डले मिथुनराशिस्थित पुनर्वसू द्वे नक्षत्रे, तेन द्विवचनं प्राप्ते युग्मकस्य एकत्वविवक्षायाम् एकवचनं विधीयते। लौकिके तु द्विवचनमेव दृश्यते। किन्तु वैदिकसंहितायामेकवचनमन्यतरस्यां भवति। यथा--पुनर्वसुर्नक्षत्रमदितिर्देवता। पुनर्वसू नक्षत्रमदितिर्देवता।

**I.2.62 विशाखयोश्च**--वैदिकसंहितायाम् पुनर्वसू नक्षत्रवत् विशाखा नक्षत्रयोर्द्वित्वविवक्षायां द्वित्वे प्राप्ते विशाखयोरेकवचनं विकल्पेन भवति। यथा--विशाखा नक्षत्रमिन्दाग्नी देवता। विशाखे नक्षत्रमिन्द्राग्नी देवता (तैत्तिरीयसंहितायाम्)।

**I.2.63 तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्**--तिष्य एकः पुनर्वसू द्वौ, तेषां द्वन्द्वो वह्वर्थकत्वात् वहुत्वविवक्षायां बहुवचने प्राप्ते द्विवचनं भवति नक्षत्रविषयकद्वन्द्वसमासे। यथा--उदितौ तिष्यपुनर्वसू दृश्यते।

**II.3.45 नक्षत्रे च लुपि**--लुबन्तान्नक्षत्रशब्दात् तृतीयसप्तम्यौ विभक्ती भवतः। यथा--मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत्।' अत्र मूलशब्देन 'मूलानक्षत्रयुक्त काल' ज्ञायते।

अत्र विकल्पे सप्तमीविभक्तौ मूले, श्रवणे इत्यपि भवति।

**III.1.116 पुष्यसिद्ध्यौ नक्षत्रे**--नक्षत्रविशेषे गम्ये पुषेः सिधेश्चाधिकरणे क्यब् निपात्यते। 'पुष्ये तु सिध्यतिष्यौ' इत्यमरः। पुष्यन्त्यस्मिन्नर्था इति पुष्यः। सिद्ध्यन्त्यस्मिन्निति सिद्ध्यः। पुष्यानक्षत्रस्य पर्यायत्वे तिष्यनक्षत्रस्य प्रयोगः संहितायां दृश्यते।

नक्षत्रविषयक त्रयोदश सूत्राणां समुल्लेखः अष्टाध्याय्यां चतुर्थाध्याये दृश्यते।

**IV.2.3 नक्षत्रेण युक्त कालः**--अत्र नक्षत्रयुक्तश्चन्द्रमाः नक्षत्रशब्देन ज्ञायते। अत्र तृतीयासमर्थाद् नक्षत्रविशेषवाचिनः शब्दाद् 'युक्तः' अर्थे यथाविहितं प्रत्ययो भवति। तर्हि पुष्येण युक्तं पौषमहः। पौषीरात्रिः।

**IV.2.4 लुबविशेषे**--यावान् कालो नक्षत्रेण युज्यतेऽहोरात्रस्तस्याविशेषे लुब् भवति। यथा--अद्य पुष्यः। अद्य कृत्तिकाः।

**IV.2.5 संज्ञायां श्रवणाश्वत्थाभ्याम्**--श्रवणशब्दादश्वत्थशब्दाच्चोत्पन्नस्य प्रत्ययस्य लुब् भवति संज्ञायां विषये, यथा--श्रवणा रात्रिः। अश्वत्थो मुहूर्त्तः। अत्र अश्वत्थशब्देन अश्विनीनामकं नक्षत्रं ज्ञायते।

**IV.2.6 द्वन्द्वाच्छः**--नक्षत्रद्वन्द्वात् तृतीयासमर्थयुक्ते काले छः प्रत्ययो भवति। यथा--तिष्यपुनर्वसवीयमहः, अद्य तिष्यपुनर्वसवीयम्।

**IV.2.23 विभाषाफाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः**--फाल्गुण्यादयः पौर्णमासीशब्दास्तेभ्यो विकल्पेन 'ठक्' प्रत्ययो भवति। पक्षेऽण् भवति। यथा--फाल्गुनिकः, फाल्गुनो वा मासः।

**IV.2.35 महाराजप्रोष्ठपदाट्ठञ्**--महाराजो देवता अस्येति विग्रहे तथा प्रोष्ठपदो देवता अस्येति विग्रहे सास्य देवता इत्यस्मिनविषये ठञ् प्रत्ययो भवति। महाराजा देवतास्य माहाराजिकम्, प्रोष्ठपदो देवता अस्येति विग्रहे प्रौष्ठपदिकम्।

**IV.3.16 सन्धि वेलाद्यृतुनक्षत्रेभ्योऽण्**--सन्धिवेलादिभ्य ऋतुभ्यो नक्षत्रेभ्यश्च कालवृत्तिभ्योऽण् प्रत्ययो भवति। यथा--तैषम्। पोषम् इत्यत्र अण् प्रत्यये तिष्यपुष्ययोर्नक्षत्राणि यलोपः इति वार्त्तिकेन यलोपे तैषम् पौषम् इति रूपं सिद्धम्।

**IV.3.28 पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद् वुन्**--पूर्वाह्णादिभ्यः शब्देभ्यो वुन् प्रत्ययो भवति 'तत्र' जातः इत्यर्थे। यथा--आर्द्रानक्षत्रे जात इत्यर्थे आर्द्रकः। एवं मूलानक्षत्रे जात मूलकः।

**IV.3.34 श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखापाढा-बहुलाल्लुक्**--श्रविष्ठादिभ्यः नक्षत्रवाचिभ्यः परस्य जातार्थप्रत्यस्य लुग् भवति। यथा--श्रविष्ठासु जातः श्रविष्ठ, फल्गुन्यो जातः फल्गुनः, अनुराधासु जातः अनुराधः, स्वात्यां जातः स्वातिः, तिष्ये जातः तिष्य, पुनर्वस्वोर्जातः पुनर्वसुः, हस्ते जातः हस्तः, विशाखयोर्जातः विशाखः, अषाढासुजातः अषाढः सर्वत्र 'लुक् तद्धितलुकि' (I.2.49) इत्यनेन तद्धितलुकि सति उपसर्जनस्त्रीप्रत्यस्य लुक् भवति। अस्मिन् प्रसङ्गे वार्तिककारेण वार्तिकत्रयमुपस्थापितम्।

**1. लुक् प्रकरणे चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम्**--अनेन चित्रायां जाता चित्रा। एवं रेवती, रोहिणी, सर्वत्र स्त्रीप्रत्ययस्य लुकि कृते, गौरादित्वात् ङीष्।

**2. फल्गुन्याषाढाभ्यां टानौ वक्तव्यौ**--अनेन फल्गुन्योर्जातित्यर्थे फल्गुनी एवं अषाढा।

**3. श्रविष्ठाषाढाभ्यां छणपि वक्तव्यः**--अनेन श्रविष्ठासु जात इत्यर्थे छण् प्रत्यये श्रविष्ठीयः भवति। एवं आषाढीयः।



**IV.3.36 वत्सशालाभिजिदश्वयुक्छतभिषजो वा**--एभ्यो जातार्थे प्रत्ययस्य लुग् वा भवति। यथा-अभिजिति जात आभिजितः, अभिजित्; अश्वयुजोर्जात आश्वयुजः, अश्वयुक्; शतभिषजि जातः शातभिषजः, शातभिषः, शतभिषक्।

**IV.3.37 नक्षत्रेभ्यो बहुलम्**--नक्षत्रेभ्य उत्तरस्य जातार्थे प्रत्ययस्य बहुलं लुक् भवति। यथा रोहिण्यां जात इत्यर्थे रोहिणः, रौहिणः। एवं मृगशिराः मार्गशीर्षः।

**IV.4.122 रेवतीजगतीहविष्याभ्यः प्रशस्ये**--रेवत्यादिभ्यः षष्ठीसमर्थेभ्यः प्रशंसने वाच्ये यत् प्रत्ययो भवति। यथा रेवत्यादीनां प्रशंसनं रेवत्यम्।

**IV.4.126 अश्विमानण्**--अश्विशब्दो यस्मिन्मन्त्रेऽस्ति सोऽश्विमान्। अश्विमच्छब्दादण् प्रत्ययो भवति। यथा- अश्विनीरुपदधाति।

**IV.4.141 नक्षत्राद् घः**--नक्षत्रशब्दाद् घः प्रत्ययो भवति स्वार्थे। यथा - नक्षत्रियेभ्यः स्वाहा।

**V.1.110 विशाखाषाढादण् मन्थदण्डयोः**--विशाखाषाढा शब्दाभ्यामण् प्रत्ययो भवति 'तदस्य प्रयोजनम्' इत्यर्थे। यथा - विशाखा प्रयोजनमस्य वैशाखो मन्थः। एवम् आषाढो दण्डः।

**V.4.120 सुप्रातसुश्वसुदिव शारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः**-एते सुप्रातादयो बहुव्रीहिसमासा अच प्रत्ययान्ता निपात्यन्ते। यथा अजपदः - अज छागः, तस्येव पादावस्येति विग्रहे अच् प्रत्यये अजपदः। एवं प्रोष्ठो गौः तस्येव पादावस्य प्रोष्ठपदः।

**VI.3.75 नभ्राण् नपान् नवेदानासत्यानमुचिनकुलनखनपुंसक-नक्षत्रनक्रनाकेषु प्रकृत्या**--नभ्राट् ... नक्षत्र ... इत्येतेषु, नञ् प्रकृत्या भवति। यथा--न क्षरतीति नक्षत्रम्। 'न क्षरते क्षीयते' इति वा नक्षत्रम्। क्षीयतेः क्षरतेर्वा क्षत्रमिति निपात्यते।

**VI.4.149 सूर्यतिष्यागस्त्यमत्स्यानां य उपधायाः**--सूर्य, तिष्य, अगस्त्य, मत्स्य --इत्येतेषां यकारस्य उपधाया भस्य लोपो भवति, ईति परतस्तद्धिते च। यथा--तिष्य--तैषमहः। तैषी रात्रिः। सूत्रेऽस्मिन् "नक्षत्रसम्बन्धिवार्तिकसूत्र दृश्यते-'तिष्यपुष्ययोर्नक्षत्राणि' तिष्येण नक्षत्रेण युक्तः कालः तैषः, एवं पौषः।

**VII.1.71 युजेरसमासे**--अनेन युजेरसमासे सर्वनामस्थाने परतो नुमागमो भवति। किन्तु असमासे अश्वयुक्, अश्वभुजौ, अश्वयुजः।

**VII.3.18 जे प्रोष्ठपदानाम्**--प्रोष्ठपदानमुत्तरपदस्याचामादेरचो वृद्धिः भवति। यथा--प्रोष्ठपदासुं जातः प्रोष्ठपादो किन्तु प्रोष्ठपदासु भवः प्रौष्ठपदः।

**VIII.3.100 नक्षत्राद्वा**--नक्षत्रवाचिनः शब्दादुत्तरस्य सकारस्य वा एति संज्ञायामगाकाराद् मूर्धन्यो भवति। यथा-रोहिणीषेणः, रोहिणीसेनः। भरणीषेणः भरणीसेनः।

पाणिनिपरम्परायाम् नक्षत्रविषयकचर्चा यादृशी दृश्यते तदन्यत्र दुर्लभमेव। यद्यपि नक्षत्रं ज्योतिर्विज्ञानस्य विषयः तथापि व्याकरणवेदाङ्गस्य माध्यमेन तस्य परिपल्लवनं भवति। राशिचक्रस्थितनक्षत्राणां परिपूर्णशब्दस्वरूपज्ञानार्थं व्याकरणवेदाङ्गस्य परिज्ञानम् अपेक्षते। अष्टाध्याय्यां यानि नक्षत्रविषयकानि सूत्राणि सन्ति तस्य पल्लवनं पुनः वार्त्तिक तथा भाष्यमध्येऽपि दृश्यते। सम्पूर्णपाणिनीयपरम्परायाम् नक्षत्रविषयिणीं चर्चामिकीकृत्य उपस्थापनेन विद्वत्समाजे ज्योतिर्विज्ञानस्याभिरुचिर्भविष्यति। एतत् तु आगामी गवेषणाकार्यस्य विषयः भविष्यति।

❖

**सन्दर्भग्रन्थाः**


1. तै. ब्रा. 1.1.2.1
2 अ.वे. XIX.7
3. अ. वे. XIX.8.1-2
4. छा. उप. VII.1.2
5. निरुक्त III.20
6. तै. सं. IV.4.10.1-3


❖



# अर्धनारीश्वरदीक्षितस्य अम्बास्तवव्याख्या दाक्षिणात्यश्रीविद्यापरम्परायां समयमतस्थानं च

एलेन फिशेर

द्राविडदेशे खैस्तीयसप्तदशशतके श्रीविद्योपासना नव्यकालीनस्मार्तसमाजस्याङ्गेषु अतीवमुख्यत्वमगच्छत्। अस्मिन्काले अग्रेसरपण्डितानां सर्वशास्त्रेष्वभिनवमतस्थापकत्वादेतत्कालस्य नव्यत्वं डा. शेल्डन् पॉलक् परिगृहीतवान्। द्राविडदेशे चास्मिन्काले श्रीविद्योपासनाविषयेऽप्येकम् अभिनवमतमुदभवत्। तत्कालीनसंस्कृतपण्डितसभासु बहव उद्धृतकवयः श्रीविद्योपासनाविषये स्तोत्रपद्धतिप्रबन्धदिग्रन्थानलिखन्। उदाहरणार्थं मदुरानगरे अत्यन्तकीर्तितकविः श्रीमदप्पय्यदीक्षितस्य कुलोद्भूते नीलकण्ठदीक्षितः सौभाग्यचन्द्रातपं नाम श्रीविद्यापद्धतिमरचयत्। काव्यदर्पणकर्ता च राजचूडामणिदीक्षितस्तदीयशङ्कराभ्युदये शङ्कराचार्यस्य कामाक्षीदेव्याराधनं श्रीचक्रध्यानं च सविस्तरमुल्लिखितवान्। तस्य राजचूडामणिदीक्षितस्य भ्राता अर्धनारीश्वरदीक्षितः पारिजातहरणविवरणसार-साहित्यप्रीणन-साहित्यसर्वस्वादिविविधग्रन्थकर्ता समयिमतजीवनमिति पञ्चस्तव्यन्तर्गताम्बास्तवस्य व्याख्यां समयतानुसारेण लिखितवान्। इदानीं चैतदेव समयिमतजीवनं निरीक्ष्य एतेषु दाक्षिणात्यविद्वत्सु समयमतमिति श्रीविद्यापरम्परायाः स्थानं विश्लेषितव्यमित्यस्य लेखस्य प्रयोजनम्।

अम्बास्तवो नाम पञ्चस्तवीतिदेवीस्तोत्रपञ्चक एकः। अस्य स्तोत्रस्य व्याख्यानावसरे तु अर्धनारीश्वरदीक्षितः अम्बास्तवस्य कालिदासमहाकविकृतित्वमङ्गीकरोति। कालीदेव्या दासः कालिदास इति निर्वचनाद्धि कालिदासस्यापि श्रीविद्योपासकत्वं तत्कालीस्मार्तैरभिरवगतम्। अत एव अम्बास्तवव्याख्यायां--"शक्तीनामभेदं प्रतिपादयन् स्वस्य कालीदासत्वात् स्वाभिमतं कालीमूर्तिमभिस्तौति"[1] इति। अपरत्रेऽपि कुसुमकुमुद्वतीयनाटकस्य प्रस्तावनायां नीलकण्ठदीक्षितस्य भ्रात्रा अतिरात्रयज्वना स्वविषये अम्बिकादासतया कालिदासस्येदमुपमानं लिखितम्--"कविरयं कालिदास इव स्वयमम्बिकादासतया तदाज्ञामन्तरेण निश्वासमपि न करोति, किं पुनरेतादृशं प्रबन्धं।"[2]

एवं च देवीभक्तत्वात् श्रीविद्योपासकत्वाच्च कालिदासस्य स्मार्तत्वं स्वीकृतं सप्तदशशतकस्मार्तपण्डितैरिति स्पष्टमेव। अतः परं शङ्कराचार्यभगवत्पादानामपि देवीभक्तत्वं श्रीविद्यापरम्परास्थापकत्वं च समकालीनैः सर्वैः स्मार्तपण्डितैरनुमोदितम्। एतदेवानुसृत्य सौन्दर्यलहरीस्तोत्रं शङ्करभगवत्पादैः रचितमित्यिदं मतमाधुनिकपण्डितेषु सुप्रसिद्धम्। अन्ये तु श्रीविद्याग्रन्थाः षोडशसप्तदशशतकावधौ लिखितास्तथापि शङ्कराचार्यरचनासु स्मार्तविद्वद्भिः परिगणिता अभवन्। एतेषु शङ्कराचार्याभिमतत्वेनोपस्थापितेषु सौभाग्यविद्या सुभगोदयश्चेति द्वौ ग्रन्थौ दाक्षिणात्यश्रीविद्यापरम्परायामत्यन्तलोकप्रियत्वेन स्थितौ। उदाहरणार्थं लक्ष्मीधराचार्यः सौन्दर्यलहरीव्याख्यानावसरे अद्यानुपलभ्यमानां स्वकृतसुभगोदयव्याख्यां चन्द्रकलाख्यामुद्दिशति--"एतत्सर्वं सुभगोदयव्याख्यानावसरे चन्द्रकलायां सम्यङ्गनिरूपितमस्माभिः।[3]

अत एव तस्मिन्समये समयनामकनव्यश्रीविद्यापरम्परायां जातायां तस्या विस्तारः शङ्कराचार्यस्य वैदिकमतानुसारिश्रीविद्योपासनोपदेशमधिकृत्य लोल्ललक्ष्मीधरार्धनारीश्वरदीक्षितादिश्रीविद्योपासकाः स्वग्रन्थान् व्यरचयन्। अम्बास्तवव्याख्यायामेव प्रारम्भे स्वकुलं शङ्कराचार्य न नमस्कृत्य अर्धनारीश्वरदीक्षितेन एतानि मङ्गलश्लोकानि लिखितानि--

**पशुपतिपञ्चरात्रगणनाथकुमारशिवागमैर्महितः ।**
**विश्वजिदादिक्रतुकृत्स रत्नखेटाध्वरिपुङ्गवो जयति॥**
**श्रीश्रीनिवासमखिनस्तस्य पुत्रो महायशाः।**
**कामाक्षीतनयः श्रीमानर्धनारीश्वरः सुधीः॥**
**तस्मादधीत्य शास्त्राणि पितुः सर्वाणि सत्गुरोः।**
**अम्बास्तवस्य व्याख्यानं कुरुते गुरुसम्मतम्॥**
**श्रीशङ्कराचार्यकृतौ प्रबन्धौ सौभाग्यविद्यासुभगोदयाख्यौ।**
**पुनः पुनः साधु विचिन्त्य बुद्ध्या तदध्वना ऽहं करवै निबन्धम्॥[4]**

एतेषु श्लोकेषु, अस्या व्याख्यायाः लेखकस्य अर्धनारीश्वर इति नाम, तस्य पित्रोः रत्नखेटः कामाक्षी चेति नामनीति स्पष्टमुल्लिखितम्। रत्नखेटदीक्षितः सेञ्जीनायकानां राजसभायां लब्धाधारः, तस्य भ्राता राजचूडामणिदीक्षितस्तु तञ्जावुरनायकानाम्,



अतश्च अम्बास्तवस्याख्यातृभूतोऽर्धनारीश्वरदीक्षितः स्वकुलसंस्कृतविदुषामुल्लासं निर्दिश्य स्वमतस्थापकभूतं श्रीमरूछङ्कराचार्य प्रणमति। तस्य व्याख्याः समयिमतजीवनमितिसंज्ञाकत्वाल् लोल्ललक्ष्मीधरप्रकाशितश्रीविद्यासमयमतमेव अत्रोपस्थापितमिति सुव्यक्तम्। अत एव वक्ष्यमाणविवेचने लोल्ललक्ष्मीधरस्य सौन्दर्यलहरीव्याख्यायाम् अर्धनारीश्वरदीक्षितस्याम्बास्तवव्याख्यायां च तुलनात्मकदृष्ट्या समयमतस्योद्भवमधिकृत्य प्रमाणानि समुपस्थापितानि, समकालीनस्मार्तसमाजे तस्य मतस्य प्राधान्यं चोपन्यस्तम्।

प्रथमं तत्र लक्ष्मीधरस्य सौन्दर्यलहरीव्याख्यायामर्धनारीश्वरदीक्षितस्य च समयमतजीवननाम्न्याम् अम्बास्तवव्याख्यायां चोदाहृतवचनानि परीक्षितव्यानि। एतयोः प्रामान्येनोदाहृतेषु समयमतमूलस्तम्भभूताः सौभाग्यविद्यासुभगोदयौ, वसिष्ट-सनक-शुक-सनन्दन-सनत्कुमार-महर्षिकृताः श्रीविद्यासंहिताश्च। अस्मिन्कालेऽपि एताः पञ्च संहिताः शुभागमपञ्चकमिति नाम्ना प्रसिद्धा आसनिति लक्ष्मीधरेणैव स्पष्टीकृतम्--

शुभागमतन्त्रपञ्चके वैदिकमार्गेणैवानुष्ठानकलापो निरूपितः। अयं शुभागमपञ्चकनिरूपितो मार्गः वसिष्ठसनकशुकसनन्दनसनत्कुमारैः पञ्चभिः मुनिभिः प्रदर्शित। अयमेव समयाचार इति व्यवह्रियते। तथैवास्माभिरपि शुभागमपञ्चकानुसारेण समयमतमवलम्ब्यैव भगवत्पादमतमनुसृत्य व्याख्या रचिता।[5]

अत एव लक्ष्मीधरीयसमयिमतपक्ष एभिः सर्वैर्ग्रन्थैरपि श्रीविद्योपासनामुद्दिश्य तस्याः परम्पराया वैदिकस्मार्तमतपरत्वमुपपाद्यते। तेषां ग्रन्थानां च वक्तृत्वेनाग्रगण्यवैदिकप्रमाणभूताः शङ्करभगवत्पादाः वैदिकमहर्षयश्च स्वीकृताः, यस्मात् सप्तदशशताब्दस्मार्तविद्वतां मते महादेवीललितात्रिपुरसुन्दर्या उपासनैवैकवाक्यतया प्रोक्तानां सर्वश्रुतीनां तात्पर्यम्। अयं च पक्षो नीलकण्ठदीक्षितेनाङ्गीकृतः सौभाग्यचन्द्रातपे--

**"एवं चैवंभूतचिच्छक्तिविशिष्टशिवज्ञानं मोक्षसाधनमिति सामान्यमुखप्रवृत्तानामपि श्रुतीनां तात्पर्यमवधृतम्।"[6]**

अत्रैव च--"उपासना ध्यानं निदिध्यासनमिति पर्यायः। तत्परस्य चैकेन जन्मना मोक्षः। उदाहृतवचनेन श्रुतम्। तथाम्युपासनाङ्गभूतार्चनस्य तथा त्वश्रवणे ङ्गिनस्तथात्वं कैमुतिकन्यायसिद्धम। ...तदर्चनं च सेतिकर्तव्यताकं नोपदिष्टं श्रुतिष्विति पुराणदिव्यागमेभ्य इतिकर्तव्या ग्राह्या।"[7]

अतश्च एवंविधं वैदिकश्रुत्यनुसारिश्रीविद्यामतं समयमतमित्याख्यातं, तन्मतानुसारेण

ललितामहात्रिपुरसुन्दरीमुपास्यन्तः स्मार्ताः समयिन इति ज्ञेयाः। लोल्ललक्ष्मीधरात्पूर्वमिदं समयमतं कुत्राप्यदृष्टं किंतु ततः पश्चाद्देव द्राविडदेशे सप्तदशशताब्दे बहवः सुविनीतसंस्कृतकवयः तदनुकूलश्रीविद्योपासनामनुष्ठातुमारब्धवन्तः। अस्याश्च समय-श्रीविद्याया वामाचाराद्यवैदिककर्मरहितायाः प्रतिपक्षं कौलमतमिति स्मृतम्। इदं लक्ष्मीधरेण प्रथममेव प्रतिपादितं कौलसमयमतभेदं अर्धनारीश्वरदीक्षितेनापि लक्ष्मीधरोक्त-मतानुरूप्येणैव स्वीयायामम्बास्तवव्याख्यायां स्वीकृतम्। वस्तुतस्तु समयमतलक्षणेन सह लक्ष्मीधरस्य रचनाशैलीमपि यथातत्त्वमेवाम्बास्तवव्याख्यायाम् अर्धनारीश्वरदीक्षितेना-वलम्बितम। समानान्यवयवान्येव प्रयुज्य लक्ष्मीधरस्य सौन्दर्यलहरीव्याख्यायाः प्रतिबिम्बमिवाम्बास्तव-व्याख्यां रचयति स्म। द्वे 'पि व्याख्ये एकामेव मातृकामनुसृत्य प्रत्येकश्लोके पदटीकां, पदयोजनां, प्रयुक्तालङ्काराणि चोपस्थापयतः। उभयमप्यन्वीक्ष्य अम्बास्तवव्याख्या लक्ष्मीधरव्याख्यायाः प्रतिरूपत्वेन रचितेति प्रत्यक्षसिद्धं भवति।

समयकौलमतलक्षणे च लक्ष्मीधरव्याख्यामनुसृत्य सविस्तरेणार्धनारीश्वरदीक्षितेन प्रपञ्चिते। तन्मते समयकौलश्रीविद्योपसनायां द्वौ मुख्यभेदौ भवतः। प्रथमं कौलोपासकाः श्रीचक्रं बाह्यपूजया आराधयन्ति, किंतु समयिन अन्तरपूजयैवाराधन्ति। द्वितीयं च सूक्ष्मशरीरे कौलोपासकाः तामसगुणपरत्वान् मूलाधरस्वाधिष्टानचक्रयोराराधयन्ति, किंतु समयिनः सहस्रदलकमल एवाराधयन्ति। अस्मिन्विषये कानिचनाम्बास्तवव्याख्याया वचनान्युदाहर्तव्यानि। प्रथमं तु वक्ष्यमाणरीत्या अर्धनारीश्वरदीक्षितेन समयिभिरन्तः पूजैवानुष्टातव्येति समयिसिद्धान्तत्वेनाङ्गीकृत्य श्रीमच्छङ्कराचार्यवचनमेव तत्प्रमाणतया प्रतिपादितम्--"समयिनां बाह्यपूजाया निषिद्धत्वादन्तर एव पूजा कर्तव्या। तदर्थं च बहिः पूजायामण्डप्रपञ्च इव अन्तःपूजायां पिण्डप्रपञ्चो निरूपणीयः। तथा हि सुभगोदये कौलशिक्षापटले--

**बाह्यपूजारताः केचित्पाषण्डा वेदनिन्दिताः।**
**कौलाः कापालिका मूलमागमैरविधानतः॥**
**निषिद्धाचरणात्पातः तेषामिति हि मे मतम्।**
**तस्मात्पीठार्चनादीनि वैदिकानां न विद्यते॥**
**अन्तः पूजारताः सन्तो वसिष्ठसनकादयः।**
**वाञ्छितां सिद्धिमापन्नास्तस्मादधिकमान्तरम्॥**



**अथ चेत्कर्षिणादीनि प्रतिष्ठादीनि चागमैः।**
**आथर्वणैरथोक्तानि बाधितार्थानि तानि किम्॥**
**सत्यं तानि तथोक्तानि स्वाधिकारानुगुण्यतः।**
**मुमुक्षूणां न तत्रास्ति किं पूजायामधिक्रिया॥**
**तस्मात्समयिनामन्तश्चक्रेष्वेवार्चनादिकम्।**
**तच्चाधारादिशुद्ध्यैव सा च वायुनिरोधतः॥**[8]

इत्यस्मिनुदाहृतवचने श्रीमच्छङ्कराचार्यैरेव समयिभिर्बाह्यपूजां त्यक्त्वान्तःपूजैव कर्तव्येति श्रीविद्यासमयिमतत्वेन स्थापितमिति अर्धनारीश्वरदीक्षितेन निर्णीतम्। नन्वियं कौलोपासकानां बाह्यपूजा कीदृशेत्याशङ्कां प्रति लक्ष्मीधरेणैव सौन्दरलहरीव्याख्यानवसर इत्थं द्योतितं--

"समयाचारो नाम आन्तपूजारतिः। कुलाचारो नाम बाह्यपूजारतिरिति रहस्यम्... श्रीचक्रस्य वियच्चक्रमिति नामान्तरमस्ति। वियच्चक्रं तु वियत्पूज्यत्वात्। वियत्पूज्यत्वं द्विविधं, दहराकाशजं बाह्याकाशजं चेति। बाह्याकाशजं नाम बाह्याकाशावकाशे पीठादौ भूर्जपत्रशुद्धपटहेमरजतादिपट्टले लिखित्वा समाराधनम्। एतदेव कौल-पूजेत्याहुर्वृद्धाः। तदुत्तरत्र स्फोर्यते। दहराकाशजं नाम हृदयाकाशावकाशे चक्रस्य पूजनम्। इदमेव समयपूजेत्याहुः समयिनः। एतदप्युत्तरत्र स्फोर्यते।"[9]

इत्युक्तवा लक्ष्मीधरेन समयिनां च कौलिकानां च पूजाविधानयोः लक्षणे निर्धारिते। समयिभिस्तु श्रीचक्रं हृदयाकाश एव किमर्थमाराध्यमिति चेदर्धनारीश्वर-दीक्षितेनाम्बास्त-वव्याख्यायां समयिनां कौलिकानां च सूक्ष्मशरीरे पूजास्थानावुपदिष्टौ। एवमुपदिश्य पुनः श्रीमच्छङ्कराचार्यवचनानि प्रमाणत्वेनोपादाय कौलानां च समयिनां च तारतम्यभेदास्तेन प्रतिपादिताः--

समयिनां सं समीचिनः अयः शुभावहो विधिरेषामस्तीति तथा। यद्वा सम्यक् अयति सहस्रकमलं गच्छतीति समया कुण्डलिनी। सा एषामस्तीति समयिनो योगिनः। अथवा समया ध्याननिष्ठाः समयिनः शाक्तैकदेशिनः। तथा हि शाक्ताः प्रथमं द्विविधा, कौलाः समयिनश्चेति। तत्र कौला द्विविधाः, पूर्वकौला उत्तरकौलाश्चेति। तत्रापि पूर्वकौलास्त्रिविधा मूलाधारनिष्ठाः स्वाधिष्ठाननिष्ठा उभयनिष्ठाश्चेति।

उत्तरकौलास्तु चतुर्विधा मातङ्गीवाराहीबगलमुखीभैरवीतन्त्रस्थाः। तदुक्तं सुभगोदये कालीभङ्गपटले--

**मूलाधारे स्वाधिष्ठाने च भजन्ति केचेशिनीम्।**

**अन्यतरस्मिंस्चान्ये तेनैते पूर्वकौलास्त्रिविधाः॥**

**मातङ्गीवाराहीबगलामुखीभैरवीतन्त्रान्तस्थिताः।**

**आन्तरपूजारहिता उत्तरकौलाश्चतुर्विधा ज्ञेयाः॥**

एतेषां सप्तविधानां कौलानां विगीताचाराणां स्मरणमपि प्रत्यवायहेतुः किं पुनस्तेषामाचारप्रदर्शनम्। अतः प्रकृतानुपयुक्तत्वाच्च नात्र विस्तरः क्रियते। समयिनस्तु चतुर्विधाः। बहिःस्वर्णादिरचितचक्रविग्रहादिषु वैदिकेन विधानेनार्चनरताः, अन्तर्बहिश्चार्चनरताः, अन्तरेवार्चनरताः, अर्चनारहिताश्चेति। अत्र ये असंजातयोगाभ्यासाः साधकास्ते चक्रविग्रहादौ देवीं वैदिकैर्विधानैराराधयन्ति, ये त्वीषज्जातयोगसिद्धयस्तेऽन्तर्बाहिश्च पूजयन्ति, ये तु सिद्धयोगास्तेऽन्तरेव देवीमर्चयन्ति, ये तु प्राप्तचित्तशुद्धयस्तेषां पूजाप्रकारश्च पूर्वमेव प्रतिपादितः। एते त्रयोऽपीच्छागृहीतशरीरां स्वाकारसदृशाकारां चन्दसहस्रसदृशां देवीं यथायोगं आराधयन्ति। ये तु प्राप्तचित्तशुद्धयस्तेषां निराकारनिर्गुणब्रह्मानुसन्धानं विधीयते। ते पूज्यपूजकधर्मातिक्रमान्नैवाराधयन्ति। तेषां कदाचिदभेदाननुसन्धाने 'पि प्रत्यवायो नास्ति।

तदीयव्यापारस्यैव तदानीं देवीपूजारूपत्वात्। तदुक्तमाचार्यैः सौन्दर्यलहरीस्तोत्रे-

**जपो जल्पः शिल्पं सकलमपि मुद्राविरचना गतिः प्रादक्षिण्यक्रमणमशनाद्याहुतिविधिः। प्रणामः संवेशः सुखमखिलमात्मार्पणतया सपर्यापर्यायस्तव भवतु यन्मे विलसितम्॥**[10] इति।

इतरत्रापि श्रीमद्गौडपादाचार्यकृतित्वेनानुमोदितायां सुभगोदयस्तुत्यां कौलिकैर्मूलाधारस्वाधिष्ठानयोरेव सामान्यतः पूजा क्रियत इत्ययं पक्षः स्वीकृतः--

**"भवेन्मूलाधारं तदुपरितनं चक्रमपि तद्द्वयं**

**तामिस्राख्यं शिखिकिरणसम्मेलनवशात्।**

**तदेतद्कौलानां प्रतिदिनमनुष्ठेयमुदितं भवत्या**

**वामाख्यं मतमपि परित्याज्यमुभयम्॥**



**अमीषां कौलानां भगवति भवेत्पूजनविधिस्तव**

**स्वाधिष्ठाने तदनु च भवेन्मूलसदने।**

**अतो बाह्या पूजा भवति भगरूपेण च**

**ततो निषिद्धाचारोऽयं निगमविरहोऽनिन्द्यचरिते॥**[11]

एतानि सर्वाण्युदाहृतवचनान्यवचित्य लक्ष्मीधरस्य सौन्दर्यलहरीव्याख्यायामार्धनारीश्वरदीक्षितस्य अम्बास्तवव्याख्यायां च समयानामकवैदिकश्रीविद्यामतं स्थापितं, तच्च नव्यकालीनद्राविडदेश अतीवलोकप्रियतामवाप्नुवत्। अनेन समयमतेन श्रीविद्योपासना वैदिकस्मार्तप्रमाणानुसारित्वेन स्मार्तविद्वत्समाजेषु पण्डितकुलेषु चाभिनवमुद्घोषिताभवत्। तस्माद्धि सप्तदशशतके नायकराजसभायां बहवः कवयः श्रीविद्यामनुष्ठातुं प्रबन्धानि रचयितुमारब्धवन्तः। तेषु प्रबन्धेषुच अर्धनारीश्वरदीक्षितस्याम्बास्तवव्याख्या प्राधान्येन परिगणिता। अतश्च लक्ष्मीधरस्य व्याख्यां निर्व्याजमनुकृत्यार्धनारीश्वरदीक्षितेन श्रीविद्योपासना श्रीमच्छङ्कराचार्योपदेशानुवर्तित्वेन दाक्षिणात्यपण्डितसभासु स्थापिता।

❖

## सन्दर्भग्रन्थाः

1. अर्धनारीश्वरदीक्षितस्य अम्बास्तवव्याख्या, ब्रह्मविद्या अद्वैतसभापत्रिका, कुम्भकोणम् 15 (3-4), 16 (1-2)

2. अतिरात्रयज्वनः कुसुमकुमुद्वतीयनाटकम्, प्रस्तावने। सम्पादक सं. जैश्री, पी-एच्. डी. शोध प्रबन्ध, मद्रास विश्वविद्यालये 1986

3. लक्ष्मीधराख्यसौन्दर्यलहरीव्याख्या पृ.57, 17 श्लोके, सम्पादक, मैसूर, 1953

4. अम्बास्तवव्याख्या, पृ.1-2

5. लक्ष्मीधराख्यसौन्दर्यलहरीव्याख्या, पृ.78, 31

6. नीलकण्ठदीक्षितस्य सौभाग्यचन्द्रातपः, सम्पादक इलेन् फिशर्, पी-एच्. डी. शोध-प्रबन्ध, कोलम्बिया विश्वविद्यालय, भविष्यत्

7. तथा

8. अम्बास्तवव्याख्या, पृ.15

9. लक्ष्मीधराख्यसौन्दर्यलहरीव्याख्या, पृ.16, 8 श्लोके

10. अम्बास्तवव्याख्या, पृ.58-59

11. सुभगोदयस्तुति 42, 43 सम्पादक, चौखम्बा

❖



# उत्तररामचरिते पर्यावरणविद्या

श्यामानन्दमिश्रः

पर्यारणस्यार्थोऽस्ति परित आवरणम्। यानि यानि तत्त्वानि अस्मानावृत्य तिष्ठन्ति अस्मज्जीवने च अनुकूलं विपरीतं वा प्रभावमुत्पादयन्ति तानि सर्वाण्येव 'पर्यावरणम्' इति पदस्याभिधेयानि भवन्ति। अतश्च पृथ्वी जलं वायुरग्निराकाशः पर्वता नद्यः वृक्षाः मानवाः पशवः अन्ये च सर्वेऽपि जीवजन्तवः पर्यावरणस्य घटका भवन्ति। यदेतेषां तत्त्वानां स्वाभाविकी दशा तत्र यदि केनापि कारणेन काचिदव्यवस्था उत्पद्यत उत्पाद्यते वा तर्हि सैवाव्यवस्था पर्यावरणस्य प्रदूषकत्वेन विगण्यते।

पुरा यद्यपि नैतादृशी पर्यावरणविषयिणी समस्या काचिदासीत्, जनसंख्याऽल्पत्वात् जने भौतिकसुखलिप्साया अभावाच्च। अतो न पृथक् पर्यावरणाख्यं किमपि शास्त्रं विरचितं मनीषिभिस्तथापि क्रान्तदर्शिभिस्तैः स्व-स्वप्रणीतेषु ग्रन्थेषु क्वचित् प्रत्यक्षं क्वचिदन्यत्र च प्रकारान्तरेण यथावसरं पर्यावारणविषयिणी सूचनन प्राचुर्येण दत्ता यद्विज्ञाय जनाः प्राणिमात्रस्य कृते पर्यावरणस्य महत्त्वज्ञानपूर्वकं तस्य संरक्षणे तद्दूषाणपनयने च प्रवृत्ताः स्युः।

उत्तररामाचरितेऽपि महाविभवभूतिना प्रकृतिवर्णनमिषेण बहुशः पर्यावरणसम्बधिनी सूचना विहिता यासां चर्चात्र क्रियते।

जलस्य किं महत्त्वमस्माकं जीवने इत्यद्य बोधयितुमावश्यता नैव। जलं संरक्षितु त्वस्माभिः सर्वात्मनाः प्रयासः करणीयः। अद्य प्रायः सर्वापि नद्यः तावन्मात्रायां प्रदूषिता यत्तासां जलमिदानीं अनेकत्र तु स्नातुमपि अयोग्यम्, का कथा तस्य पानस्य? नगरक्षेत्रेषु गृहसंयन्त्रादिभ्यो निर्गतमतिप्रदूषितं जलं समीपस्थासु प्रवहमानासु नदीषु निपत्य तज्जलानि नितरां प्रदूषयति। दूषितं जलं प्राणवायोः अभावात् जलचरणां किं च, मनुष्यपशुपक्षिवनस्पतीनां कृते व्याधिकरं प्राणापहारकं च भवति।

उत्तररामचरितकारेणापि एतत्सर्वं विज्ञायैव विविधप्रकारेण जलस्य महत्त्वं प्रकाश्य प्रकारान्तेरेण तस्य संरक्षणायास्माभिः प्रयतितव्यमित्युपदिष्टम्। सर्वप्रथमं तु

वासन्तीगङ्गागोदावरीतमसा- मुरलाप्रभृतीनां वननदीनाममूर्तपदार्थानां मानवीकरणेन देवतात्वाधानेन च प्रकृतिप्रेमप्रदर्शनद्वारा महाकविना प्रकारान्तरेण पर्यावरणे एतेषां महत्त्वमपि प्रदर्शितमेव। अन्यत्रापि ''जाने पुनरपि प्रसन्नगभीरासु वनराजिसु विहृत्य पवित्रनिर्मलशिशिरसलिलां भगवतीं भागीरथीमवगाहिष्ये'' इत्येतेन सीतासंवादमाध्यमेन नदीवृक्षयोः सुखकरत्वं प्रतिपादयता महाकविना प्रत्यक्षमेवावेदितमेतयोर्महत्त्वं पर्यावरणे।

गङ्गायाः प्रकर्षं प्रतिपादयत् तमसायाः- सर्वदेवताभ्यः प्रकृष्टतममैश्वर्यं मन्दाकिन्याः (पृ. 189) इतीदं वचोऽपि जलमात्रस्यास्मज्जीवने महत्त्वाख्यापुरस्सरं तद्दूषणान्निवर्तितव्यम् अस्माभिरित्यपि सन्दिशत्येवेत्यवगन्तव्यम्।

अथ च, नाटकस्य सप्तमाङ्के भरतवाक्ये रामकथायाः प्रकर्षप्रतिपादनावसरे यदुक्तं तदप्यत्र द्रष्टव्यम्-

**पाप्मभ्यश्च पुनाति वर्धयति च श्रेयांसि सेयं कथा,**

**मङ्गल्या च मनोहरा च जगतो मातेव गङ्गेव च॥ 7.21**

अत्र गङ्गारामकथयोरुपमानोपमेयभावप्रदर्शनपुरस्सरं 'पाप्मभ्यः पुनाति', 'श्रेयांसि वर्धयति' इत्यादिविशेषणदलेन गङ्गायाः किं वा जलमात्रस्य व्याधिहरत्वं प्राणप्रदत्वं च प्रतिपादितमिति सुव्यक्तमेव।

एवमेव गोदावर्या अपि प्रकर्षः प्रतिपादित उत्तररामचरिते। तदत्र द्रष्टव्यम्-

**स्मरसि सरसनीरां तत्र गोदावरीं वा।**

**स्मरसि तदुपान्तेष्वावयोर्वर्तनानि॥ 1.26**

चित्रदर्शनावसरे सरसनीरां गोदावरीं तस्यास्तटप्रदेशे सीतारामयोः सुखकरं भ्रमणं च स्मारयत् पद्यार्धमिदं जलस्योपयोगित्वं स्पष्टमेवावेदयति।

वायुतत्त्वं पर्यावरणघटकेषु अतिमहत्त्वपूर्णं वर्तते। वस्तुतः प्राणिमात्रस्य जीवनार्थं प्राणवायुः (वगलहमद) परमावश्यको वर्तते। एतेन विना तु पृथिव्यां जीवनस्य सम्भावना सर्वथा नास्तीत्येतत् सम्यग् ज्ञातमासीदुत्तररामचरितकृतः।

पंचवटीवने दीर्घशोकसन्तापेन सन्तप्तस्य रामचन्द्रस्य संरक्षणार्थं गोदावरीं निर्दिशन्त्या अगस्त्यपत्न्या लोपामुद्रया मुरलामुखेन यदुक्तम्-

**वीचीवातैः शीकरक्षोदशीतैराकर्षद्भिः पद्मकिञ्जल्कगन्धान्।**

**मोहे मोहे रामभद्रस्य जीवं स्वैरं स्वैरं प्रेरितैस्तर्पयेति॥ 3.2**

इत्यत्र न केवलं गोदावर्याः, प्रत्युत वायोरपि सुखातिशयकरत्वं प्राणप्रदत्वं च



प्रत्क्षमेव प्रतिपादितं महाकविभवभूतिना।

योऽयं वायुः शुद्धे सुवासिते च सति प्राणदायकः स एव प्रदूषिते सति प्राणहारकोऽपि भवितु शक्नोति। ततो नायं वायु प्रदूषितः स्याद् अतएव कामयते उत्तररामचरितकृत्---**स्फुटितकमलामोदप्रायाः प्रवान्तु वनानिलाः। 3.24**

पर्यावरणसंरक्षणे पर्वतानां योगो महत्त्वपूर्ण इत्यपि सूचितमेव उत्तररामचरिते। तदत्र पद्यांशे द्रष्टव्यम्--

**सोऽयं शैलः ककुभसुरभिमाल्यवान्नाम यस्मिन्**

**नीलः स्निग्धः श्रयति शिखरं नूतनस्तोयवाहः॥1.33**

अन्यच्च--**मेघालम्बितमौलिनीलशिखराः क्षोणीभृतो दाक्षिणाः। इति2.30**

अत्र 'नूतनस्तोयवाहः शिखरं श्रयति', 'मेघालम्बितमौलिनीलशिखराः' प्रभृतिविशेषणदलेन यद् शिखराणां मेघाश्रयत्वं निर्दिष्टम्, तेन पर्वतानां मेघमार्गावरोधपुरस्सरं वर्षाकारणत्वं प्रदर्शितं भवतीत्यवगन्तव्यम्।

किं च, एते पर्वता एव विविधसभ्यतानां जीवनरेखारूपिण्यो याः गङ्गासिन्धुनीलादयो नद्यस्तासामुद्गमस्थलान्यपि वर्तन्त इत्यपि प्रत्यक्षं प्रकारान्तरेण वाऽनेकत्र प्रतिपादितमुत्तररामचरिते। तदत्र द्रष्टव्यम्--

**एतानि तानि बहुकन्दरनिर्झराणि**

**गोदावरीपरिसरस्य गिरेस्तटानि॥ 3.8**

पर्यावरणे पारिस्थितिकसन्तुलने वनवृक्षपशुपक्षीणामपि अतिशयो योगो भवतीत्येतदपि सुविज्ञातमेवासीत्तररामचरितकृतः। वनस्य प्रकर्षः प्रकारान्तरेण कथमावेदितः सुभगमृगमयूराणामाश्रयभूतानां वनानां सौन्दर्यप्रतिपादनपरे शम्बूकालापे तदत्र द्रष्टव्यम्-

अथैतानि मदकलमयूरकण्ठकोमलच्छविभिरवकीर्णानि पर्यन्तैरविरलनिविष्टनीलबहुलच्छायातरुषण्डमण्डितान्यसम्भ्रान्तविविधमृगयूथानि...प्रशान्तगम्भीराणि...महारण्यानि।2.19

अथ च, वनानां महती भूमिका अस्माकं जीवने किं च पर्यावरणे इति सम्यग् बोधयति पंचवटी प्रविष्टस्य रामस्य स्वागतं व्याहर्तुं वनदेवताया वासन्त्या इदं वचः-

**ददतु तरवः पुष्पैरर्घ्यं फलैश्च मधुश्च्युतः**

**स्फुटितकमलामोदप्रायाः प्रवान्तु वनानिलाः।**

**कलमविरलं रज्यत्कण्ठाः क्वणन्तु शकुन्तयः**

**पुनरिदमयं देवो रामः स्वयं वनमागतः॥ 3.24**

नाटके स्थाने स्थाने सीतारामयोः वृक्षादीन् प्रति स्नेहभावः प्रदर्शितोऽस्ति। शम्बूकवधादनन्तरं पंचवट्यां गोदावर्याः तटप्रदेशे भ्रमन् रामो यद् वृक्षादिभिः सह आत्मनो बन्धुभावं स्मरति तदत्र द्रष्टव्यम्--

**यत्र द्रुमा अपि मृगा अपि बन्धवो मे यानि प्रियासहचरश्चिरमध्यवात्सम्।**
**एतानि तानि बहुकन्दरनिर्झराणि गोदावरीपरिसरस्य गिरेस्तटानि॥ 3.8**

एवमेव सीताया अपि पुत्रवत् स्नेह आसीत् वनपशुपक्षिषु। अत्र प्रमाणं सीताया एव संवादांशः--

तदेव पंचवटीवनम्, सैव प्रियसखी वासन्ती, त एव विविधविस्रम्भसाक्षिणो गोदावरीकाननोद्देशाः, त एव जातनिर्विशेषा मृगपक्षिणः पादपाश्च। (3.21 संवादांशः)

अन्यत्रापि कतिपयकुसुमोद्गमः कदम्बः प्रियतमया परिवर्धितोऽयमासीत्...(3.20), अत्रस्थिता तृणमदाद् वनगोचरेभ्यः सीता ततो हरिणकैर्नमुच्यते स्म...(3.21), करकमलवितीर्णैरम्बुनीवारशष्पैस्तरुशकुनिकुरङ्गान् मैथिली यानपुष्यत्...(3.25) इत्यादीनि वचांसि अस्मानपि पर्यावरणघटकानामेतेषां संरक्षणार्थं प्रेरयन्त्येवेत्यत्रासन्देहः।

उच्चार्यमाणस्य शब्दस्य ध्वनेर्वाऽपि पर्यावरणे महती भूमिका भवति। ध्वनिः मृदुः श्रवणेन्द्रियसहः (20-40) च भवति चेत् न केवलं मनुष्यजातस्य, अपितु प्राणिमात्रस्य सुखमावहति। विपरीतमेतत् कटूच्चारिताः शब्दाः श्रवणेन्द्रियेण सोढुमक्षमा अतएव असुखकरा भवन्ति। तीव्रैः ध्वनितरैः रक्तस्पन्दे वृद्धिः आहारनलिकायां क्षतिः मांसखडेषु विच्छेदः किञ्च श्रवणशक्तिह्रासोऽपि जायत इति विविधैः शोधैः चिकित्साविज्ञानिभिरनेकशः प्रमाणीकृतम्। उत्तररामचरितेऽपि उन्मत्तां दृप्तां च वाचं 'राक्षसी वाक्' इति प्रतिपादयता तयोः सर्ववैराणां कारणत्वं च व्याहरता महाकविना स्पष्टमेव प्रतिपादितं ध्वनिप्रदूषणस्य दुष्परिणाममित्यत्रासन्देहः। उक्तं हि तत्र-

**ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदृप्तयोः।**
**स योनिः सर्ववैराणां सा हि लोकस्य निष्कृतिः॥**
**इति ह स्म तां निन्दन्ति। इतरामभिष्टुवन्ति** इति। 5.29

उपर्युक्तविवरणेनेदं स्पष्टं यदुत्तररामचरिते महाकविभवभूतिना नैकशः पशुपक्षिवृक्षजलनदीनां महत्त्वप्रतिपादनद्वारा पर्यावरणे एतेषां महत्त्वमस्मान् विज्ञाप्य एतेषां रक्षणे अस्माभिः प्रवर्तितव्यमिति बोधितम्।

❖



# पाणिनीया 'अधिकार' व्यवस्था

डॉ. देवनाथ त्रिपाठी

सूत्रशब्दः 'सूत्र् वेष्टने' इति धातोः अच्प्रत्ययेन निष्पद्यते। तदेवं संक्षेपेण कथनम् इत्यस्य शब्दस्य तात्पर्यम् इति बुधैः स्वीकृतम्। एतस्य स्वरूपं स्कन्दपुराणे यत् प्रदर्शितम् तदेवम्--अल्पाक्षरमसन्दिग्धं सारवद् विश्वतोमुखम्। अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः। महावाक्यदृष्ट्या सम्पूर्णाष्टाध्यायी सूत्रमेकमेव, तथापि व्याकरण-प्रक्रियायां योगविभागं परिकल्प्य चतुःसहस्रसूत्रात्मिकाष्टाध्यायीति प्रवादः प्रायेण सङ्गच्छते। किञ्च एकस्यैव सूत्रस्य षड्विधत्वं व्याकरणनिकाये केषामविदितम्। तद्यथा-संज्ञा च परिभाषा च विधिर्नियम एव च। अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् इति। संज्ञादिषड्विधसूत्रविभागे विधिसूत्रं मुख्यम्, तत्परित्यज्य सर्वाण्यन्यानि सूत्राणि गौणानीति मन्यते। व्याकरणप्रक्रियायामत्यन्तमप्राप्तस्य यणादिरूपवस्तुनो यद् विधानं विधिसूत्रेण सम्पाद्यते तत्रैव विधाने अन्यानि सूत्राणि सहकारितां भजन्ते। प्रक्रियायां व्याकरणोपयोग्यर्थस्य निष्पत्तिर्लक्ष्यम्, तत्सम्पादने विधिसूत्रं प्रामुख्येन अन्यानि च सूत्राणि गौणेन स्वस्वभूमिकां प्रपद्यन्ते। अधिकारशब्दः कर्मणि भावे वा अधिपूर्वककृधातोः घञ्प्रत्ययेन निष्पन्नः। कर्मणि व्युत्पत्तिर्यथा-अधिक्रियते उपरितनसूत्र-जालेषु पठ्यत इति यावत् भावे व्यापारणं व्यापृतिरिति यावत्। 'स्वदेशे अर्थबोधशून्यत्वे सति परदेशे अर्थबोधकत्वम्' इदमधिकारसूत्रस्य लक्षणमितस्ततः शास्त्रेषूपलभ्यते। एतल्लक्षणस्य तात्पर्यमिदमेव यद् विधिसूत्रेण सह सम्मिल्य अधिकारसूत्रमर्थवद् भवति, प्रक्रियायामेवाक्यतया तस्योपयोगो जायत इति यावत्।

परमिदमितरव्यावर्तकं लक्षणं नास्ति। परिभाषेन्दुशेखरस्य विजयाटीकायामुपलभ्य-मानस्य परिभाषासूत्रस्य इतरव्यावर्तकं लक्षणमाधारीकृत्य अधिकारसूत्रस्यापि तन्निर्मातुं शक्यते। विजयोक्तलक्षणं तावदेवम्-विधिशास्त्रप्रवृत्तिनिवृत्त्युपयोगिसाधुत्वाप्रकारकशक्तय-विषयकबोधजनकत्वे सति अधिकारशास्त्रभिन्नत्वं परिभाषात्वम्,[1] एतस्मिंल्लक्षणे

लक्षणं सौकर्येण समुपलब्धं भवति। तद्यथाविधिशास्त्रप्रवृत्तिनिवृत्त्युपयोगिसाधुत्वाप्रकारक-शक्तयविषयकबोधजनकत्वे सति परिभाषाशास्त्रभिन्नत्वमधिकारत्वम्। एतल्लक्षणस्य लक्ष्ये नियोजनश्चेत्थम्--'तस्मिन्निति निर्दिष्टे पूर्वस्य' इदं सूत्रं परिभाषासूत्रमस्ति। सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेण व्यवहितस्य पूर्वस्य बोध्यमित्यनेन सूत्रेण बोधो जायते। अयं बोधः 'इको यणचि' इति विशिशास्त्रस्य प्रवृत्तौ उपयोगी। स्वतः शब्दसाधुत्वप्रतिपादकत्वाभावात् नायं बोधः साधुत्वप्रकारकः नापि शक्तिविषयकः। साधुत्वप्रकारकबोधो विधिशास्त्रेण भवति शक्तिविषयकबोधश्च संज्ञाशास्त्रेण जायते। अतः शक्तयविषयकबोधजनकत्वपर्यन्तलक्षणस्य परिभाषाशास्त्रे सम्भाविता या अतिव्याप्तिः तस्याः निराकरणार्थं लक्षणे परिभाषाशास्त्रभिन्नत्वं निविष्टम्। लक्षणे शक्तयविषकत्वांशस्तु संज्ञाशास्त्रस्य व्यावृत्त्यर्थमिति स्पष्टमेव। विधिशास्त्रस्यापि शब्दसाधुत्वप्रतिपादकत्वमस्त्येव। इत्थं लक्षणे साधुत्वप्रकारकविशेषणदानेन विधिसूत्रेषु सम्भावितातिव्याप्तेः वारणं भवति। अतिदेशशास्त्रेषु तेषां कार्यातिदेशपक्षस्य शास्त्रे मुख्यपक्षत्वेनाभिमतत्वात् तदपि साधुत्वप्रकारकबोधजनकमेव। नियमशास्त्रस्य विधिमुखेन प्रवृत्तिपक्षे साधुत्वप्रकारक-बोधजनकत्वं स्पष्टमेव। तस्य निषेधमुखेन प्रवृत्तिपक्षे विधिसूत्रेण सहैकवाक्यतायां सम्पन्नायामेव शाब्दबोधः सम्पद्यते। अतः निषेधशास्त्रमपि परम्परया साधुत्वप्रकारक-बोधजनकमिति सिद्धम्। एवं शक्ताविषयत्वविशेषणेन संज्ञाशास्त्रस्य परिभाषाभिन्नत्व-विशेषणेन परिभाषाशास्त्रस्य साधुत्वप्रकारकबोधजनकत्वविशेषणेन च विधिनियमातिदेश-निषेधशास्त्राणां व्यावृत्तौ अधिकारस्य उपर्युक्तलक्षणं निर्दुष्टं भवति।

'षष्ठी स्थानेयोगा' इत्यत्र स्थितं महाभाष्यम् अधिकारविषये इत्थं वदति--'अधिकारो नाम त्रिप्रकारः। कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति, यथा प्रदीपः सुप्रज्वलित; सर्वं वेश्माभिज्वलयति। अपरोऽधिकारः-यथा रज्ज्वा अयसा वा बद्धं काष्ठमनुकृष्यते तद्वदनुकृष्यते चकारेण। अपरोऽधिकारः प्रतियोगं तस्यानिर्देशार्थ इति योगे योगे उपतिष्ठते।' अत्र प्रथमोऽधिकारः परिभाषारूपो वर्तते। अत एव प्रदीपकारो ब्रवीति-'पारार्थ्यसाम्यात्परिभाषाप्यधिकार उच्यते' इति। द्वितीयोऽधिकारो यथा लोके एकत्र स्थितं काष्ठं रज्ज्वा अयसा वा अन्यत्रानीयते, तथैव व्याकरणशास्त्रेऽपि चकारादिग्रहणबलेनान्यसूत्रसम्बद्धं पदमन्यस्मिन् सूत्रे आनीयते। इदं पदानयनं क्वचिदनुवृत्तिरूपेण क्वचिदपकर्षणरूपेण क्वचिच्चनुकर्षणरूपेण भवति। यत्र पूर्वसूत्रस्थं किमपि पदं व्याकरणोपयोग्यर्थनिष्पत्त्यर्थं साकाङ्क्षं सदुत्तरसूत्रे नीयते, तत्रानुवृत्तिः।



यत्र चोत्तरसूत्रस्थं पदं पूर्वसूत्रे नीयते, तत्रापकर्षणम्। यत्र च चकारादिबलेन पूर्वसूत्रस्थं पदमुत्तरसूत्रे नीयते, तत्रानुकर्षणम्। पुनश्च धारावाहिकमण्डूकप्लुतिभेदेन अनुवृत्त्यादिषु त्रिष्वपि रूपेषु द्वौ द्वौ भेदौ भवतः। यत्र पूर्वोत्तरसूत्राभ्यां पदानां जलप्रवाह इव मध्यस्थितानि सूत्राण्यपरित्यज्य सर्वत्रोपस्थितिः स पक्षो धारावाहिपक्षः। यथा गङ्गाप्रवाहः स्वमार्गे आगतं सकलं स्थानमभिव्याप्त तिष्ठति तथैवायमधिकारः स्वप्रकरणस्थेषु सर्वेषु सूत्रेषु व्यापृयते। अतः प्रत्ययः, परश्च इति सूत्रद्वयस्थितयोः प्रत्ययः परश्च इति पदयोः परवर्तिसूत्रेष्वविच्छिन्नरूपेणानुवृत्तिर्भवति। अयमेव महाभाष्य-कारस्य तृतीयोऽधिकारः। यत्र कुत्रचित् सूत्रस्थं पदं कस्मिंश्चिद् व्यवहिते सूत्रे मण्डूकोप्लवनरीत्या मध्यस्थितानि सूत्राणि परित्यज्योपस्थितं भवति तत्र मण्डूकप्लुतिपक्षः। यथा-इको यणचि इति सूत्रस्थितमचिपदं मध्यस्थितमेचोऽयवायाव इति सूत्रेऽनुवर्तमानं सद् मध्यस्थितान्यन्यानि सूत्राणि परित्यज्य आद्गुणः इति सूत्रेऽनुवर्तते। तेन आद्गुण इत्यनेन अज्निमित्तोपस्थितिसंभवं गुणकार्यविधानं सम्पद्यते। केचित्तु--

**गोयूथः सिंहदृष्टिश्च मण्डूकप्लुतिरेव च।**
**गङ्गाप्रवाहवच्चापि अधिकारश्चतुर्विधः॥[2]**

इति कारिकोक्तदिशा अधिकारस्य चतुर्विधत्वं प्रतिपादयन्ति। एतेषु मण्डूकप्लुतिः गङ्गाप्रवाहश्च पुरस्तात् साम्प्रतमेव अवोचाम। अवशिष्टौ द्वौ पक्षौ चेत्थम्--

यथा गोयूथः क्षेत्रेषु परिभ्रमन् भक्ष्यं तृणमेवात्ति, अभक्ष्यं किमपि तृणं लभ्यते चेत् तत्परित्यज्य अग्रे गच्छति भक्ष्यतृणमेवात्ति च, तथैव किमप्यधिकारसूत्रं यत्र तस्य पदं साकाङ्क्षं नास्ति तत्सूत्रं परित्यज्य अन्यत्र साकाङ्क्षस्थले स्वपदार्पणं करोति। यथा-एकाचो द्वे प्रथमस्य इत्यधिकारसूत्रं, अजादेर्द्वितीयस्य, नन्द्राः संयोगादयः इति सूत्रद्वयं परित्यज्य 'पूर्वोऽभ्यासः' 'लिटि धातोरनभ्यासस्य' इत्यनयोः सूत्रयोः अधिक्रियते। अस्याधिकारस्य मण्डूकप्लुतेः पृथक् किमपि वैलक्षण्यं न प्रतिभाति, मध्यस्थसूत्राणां परित्यागः उभयत्र समान एव।

क्वचित् सिंहदृष्टिवदप्यधिकारो प्रचलति। सिंहो यथा स्वाग्रे स्थितं किमपि लक्ष्यमाकर्षति, तथैव यदा कस्मिंस्वित् परवर्तिसूत्रे स्थितं किमपि पदं पूर्ववर्तिसूत्रेणापकृष्यते, तदैवायमधिकारः सिंहदृष्टिपदेन सिंहावलोकितपदेन वा व्यवह्रयते। यथा-वृद्धो यूना तल्लक्षणश्चेदेव विशेषः इति परवर्तिसूत्रात् एवपदं सरूपाणामेकशेष एकविभक्तौ इति सूत्रेऽपकृष्यते।

आचार्येण पाणिनिनापि अधिकारस्य लक्षणं स्वरितेनाधिकार इति कृतमस्ति। अस्य सूत्रस्य च्छेदो द्विधा भवति-स्वरितेन अधिकारः, स्वरिते नाधिकार इति। प्रथमपक्षे इत्थंभूतलक्षणे इति तृतीया। अस्मिन् पक्षे स्वरितत्वधर्मेण अधिकारस्य ज्ञानं भवति। अतः स्वरितत्वधर्मयुक्तं पदमधिकृतं बोध्यम् इत्यर्थः सम्पद्यते। द्वितीयपक्षानुसारं परवर्तिसूत्रे यदि किमपि पदं स्वरितत्वधर्मयुक्तमस्ति तदा पूर्वत्रोपस्थित-स्याधिकारस्य निवृत्तिर्भवति। वस्तुतोऽयं नियमः सार्वत्रिको नास्ति, अधिकारस्य प्रवृत्तौ अधिकृतपदस्य सापेक्षत्वं निवृत्तौ च निरपेक्षत्वमेव लिङ्गम्। परमिदमप्यत्रावधेयं यदस्मिन् सूत्रे पारिभाषिकस्वरितस्य ग्रहणं नास्ति, समाहारः स्वरितः इति विहितस्य पारिभाषिकस्वरितस्य केवलं स्वरधर्मत्वात्। स्वरितेनाधिकार इत्यत्र गृहीतः स्वरितो वर्णधर्मोऽस्ति। अयं धर्मो यथा स्वरस्य तथा व्यञ्जनस्यापि। वर्णधर्मोऽयं वर्णदोष इति पदमञ्जरीकारः। तथा च वदति सः पदमञ्जर्याम्-'अत्र पारिभाषिकस्य स्वरितस्य ग्रहणे 'रषाभ्यां नो णः' इत्यादौ नकारादेर्व्यञ्जनस्याधिकारोपलक्षणं नोक्तं स्यात् पारिभाषिकस्याज्धर्मत्वाद्' इति। कथं कर्णदोष इत्यत्र तस्योक्तिरेवम्--'स चायं धर्मः कलाध्मातादितुल्यः केवलं सूत्रेष्वेव भवति, न प्रयोगे' इति।

अधुनाष्टाध्याय्यामागतानामधिकारसूत्राणां स्वस्वप्रकरणविशेषं प्रदर्शयतां यथाक्रमं निर्देशः क्रियते। आकडारादेका संज्ञा 1।4।1, कारके 1।4।23, प्राग्रीश्वरान्निपाताः 1।4।56, कर्मप्रवचनीयाः 1।4।83, प्राक्कडारात्समासः 2।1।3, सह सुपा 2।1।4, अव्ययीभावः 2।1।5, विभाषा 2।1।11, तत्पुरुषः 2।1।22, अनमिहिते 2।3।1, तत्पुरुषोऽनञ्कर्मधारयः 2।4।19, आर्धधातुके 2।4।35, प्रत्ययः 3।1।1, परश्च 3।1।2, धातोः 3।1।19, भूते 3।2।84, आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु 3।2।134, वोताप्योः 3।3।141, लस्य 3।4।77, ङ्याप्प्रातिपदिकात् 4।1।1, स्त्रियाम् 4।1।3, तद्धिताः 4।1।76, समर्थानां प्रथमाद्वा 4।1।82, प्राग्दीव्यतोऽण् 4।1।83, शेषे 4।2।92, प्राग्वहतेष्ठक् 4।4।1, प्राग्घिताद्यत् 4।4।75, प्राक्क्रीताच्छः 5।1।1, प्राग्वहतेष्ठञ् 5।1।18, आर्हादगोपुच्छसङ्ख्यापरिमाणाट्ठक् 5।1।19, कालात् 5।1।78, आं च त्वात् 5।1।120, प्राग्दिशो विभक्तिः 5।3।1, प्रागिवात्कः 5।3।70, समासान्ताः 5।4।68, एकाचो द्वे प्रथमस्य 6।1।1, संहितायाम् 6।1।72, एकः पूर्वपरयोः 6।1।84, सुट् कात् पूर्वः 6।1।135, उत्तरपदादिः 6।2।111, आदिरुदात्तः 6।2।64, अन्तः 6।2।92,



अन्तः 6।2।143, अलुगुत्तरपदे 6।3।1, संहितायाम् 6।3।114, अङ्गस्य 6।4।1, असिद्धवदत्राभात् 6।4।22, आर्धधातुके 6।4।46, भस्य 6।4।129, मपर्यन्तस्य 7।2।91, उत्तरपदस्य 7।3।10, सर्वस्य द्वे 8।1।1, पदस्य 8।1।16, पदात् 8।1।17, अनुदात्तं सर्वमपदादौ 8।1।18, पूर्वत्रासिद्धम् 8।2।1, वाक्यस्य टेः प्लुत उदात्तः 8।2।82, तयोर्य्वावचि संहितायाम् 8।2।108, अत्रानुनासिकः पूर्वस्य तु वा 8।3।2, अपदान्तस्य मूर्धन्यः 8।3।55, इण्कोः 8।3।57, प्राक्सीतादड् व्यवायेऽपि 8।3।63.

अत्रेदमवधेयं यत् सर्वेषामधिकाराणामस्यां सूचौ निर्देशो नास्ति। इदं प्रतिभाति यदष्टाध्यायां पाणिनिरधिकारस्य प्रकारत्रयं निर्दिशति। प्रथमोऽधिकारस्तत्र यत्राचार्येण अधिकारक्षेत्रस्य स्वयं निर्देशः कृतः, यथा आकडारादेका संज्ञा प्राग्रीश्वरान्निपाताः प्राक्कडारात्समासः प्राग्दीव्यतोऽण् इत्यादि सूत्राणि। एतस्मिन् वर्गे तेषां सूत्राणां समावेशो वर्तते यत्र क्वचिद् आ इत्यस्य पदस्य योगे क्वचित् प्रागित्यस्य पदस्य योगे अवधिसूचकस्य पञ्चम्यन्तस्य पदस्य प्रयोगो विद्यते। एतादृशेषु स्थलेषु सर्वत्राधिकारत्वं स्पष्टमेव। द्वितीयादिकारस्तत्र यत्राचार्येण स्वयमधिकारस्य क्षेत्रं न निर्दिष्टमपितु तत्तत्प्रकरणानुसारं व्याख्यानेन अधिकारस्यावधिः परवर्तिवैयाकरणैर्निर्धारितो वर्तते, यथा कारके, कर्मप्रवचनीयाः, विभाषा, अनभिहिते, भूते, लस्य इत्यादि सूत्राणि। अत्राधिकारसूचौ केवलं तेषां सूत्राणां ग्रहणमस्ति येषामुभयथा प्रतिपादनं भवितुं शक्नोति तृतीयाधिकारस्तु तत्र भवति यत्र विशेषस्य कस्यापि प्रकरणस्य निर्देशं विना अनुवृत्त्यादिमाध्यमत्रयेषु केनाप्येकेन साकाङ्क्षत्वात्तदधिकृतस्य कस्यापि पदस्य परत्रोपस्थितिर्जायते येन वाक्यार्थसम्पादने परत्र या आकाङ्क्षा सा समापन्ना भवति यथा इको यणचीत्यत्राचिपदमेचोयवायावः, आद्गुण इत्यादि स्थलेषु साकाङ्क्षो भूत्वां अभीष्टं सूत्रार्थं जनयति। अधिकारोऽयमपेक्षालक्षणः, यत्र तस्यापेक्षा तत्र तस्योपस्थितिः। एवमिदं वक्तुं शक्यते यत् स्वरितत्वधर्मयुक्तत्वेन किमपि सूत्रमष्टाध्याय्यामेकं विशिष्टं प्रकरणं द्योतयदधिकारसूत्रसंज्ञां भजते--यथा आकडारादेका संज्ञा, कारके, स्त्रियाम्, प्रत्ययः परश्च इत्यादीनि सूत्राणि। यदा कस्मिन्नपि सूत्रे किमप्येकं पदं स्वरितत्वधर्मयुक्तत्वेनाधिकृतमस्ति तत् सूत्रमधिकारसूत्रसंज्ञां न लभते-यथा इको यणचि इत्यत्र गृहीतमचि इति पदम्, स्तोः श्चुना श्चुः इत्यत्र गृहीतं स्तोः पदं, स्त्रीभ्यो ढगित्यत्र स्त्रीपदमिति यावत्। परं अधिकृतपदस्यैव परत्रोपस्थितिर्भवतीति

न्यायेन वा सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र इति न्यायेन तत्तत्पदस्यापि अधिकारोऽस्तीति स्वीकरणीयम्। अत्रानुवर्तनपदमनुकर्षणापकर्षणयोरप्युपलक्षणम्। अधिकृतत्वात् तस्य पदस्य कुत्रचिदनुवृत्त्या कुत्रचिदनुकर्षणेन कुत्रचिच्चापकर्षणेन परत्रोपस्थितिर्भवतीति पुरस्तादवोचाम। पुनश्चेयं परत्रोपस्थितिः त्रिधा भवतीति वक्तुं शक्यते--गङ्गाप्रवाहवत् मण्डूकप्लुतिवत् सिंहावलोकितवच्च। परत्रोपस्थितिरूप-कार्यानुमिताधिकारस्य यो गोयूथरूपपक्ष उपरिष्टात् कारिकायामभिहितस्तस्य मण्डूकप्लुतौ समावेशसम्भवादधिकारस्य चतुर्विधत्वं यत्तत्र प्रतिपादितं तच्चिन्त्यम्।

❖

### सन्दर्भग्रन्थाः


1. प्रो. श्रीनारायणमिश्रकृतपरिभाषेन्दुशेखरस्य प्रस्तावनायामुद्धृतम् चौखम्बा प्राच्यविद्या ग्रन्थमाला, 2001, पृष्ठम् 12

2. व्याकरणशास्त्रे लौकिकन्यायानामुपयोगः, डा. रामकिशोरशुक्लः, सम्पूर्णानन्द-संस्कृतविश्वविद्यालयः, 1992, पृष्ठम् 35


❖



# अच्युतरायमोडककृत-साहित्यसारस्य परिचयात्मकं विवरणम्

विमलेन्दु कुमार त्रिपाठी

काव्यशास्त्रपरम्परायामाचार्योऽच्युतरायमोडकः स्वीयं विशिष्टं स्थानमावहति। अनेन विरचितः साहित्यसारमिति नामा ग्रन्थः साहित्यशास्त्रस्य गम्भीरतत्त्वव्याख्यापकोऽस्ति। आचार्योऽसौ नासिकप्रदेशस्य 'पंचवटी' इत्याख्ये ग्रामे 18-19 शताब्द्यामजनि।[1] लब्धप्रतिष्ठः संस्कृतसाहित्यस्य प्रसिद्धेतिहासकारः सुशील कुमार डे स्वकीये "History of Sanskrit Poetics" इति नामके ग्रन्थे आचार्यस्यास्य पितुर्नाम नारायणः, मातुर्नामान्नपूर्णा गुरोर्नाम च षष्ठिनारायण इति ख्यापयति।[2] आचार्यमोडकेन स्वकीये "प्रारब्धध्वान्तसंहृतिः" नामके ग्रन्थे रघूत्तमाचार्योऽपि गुरुरूपेण चर्चितोऽस्ति।[3]

संस्कृतसाहित्यशास्त्रस्योद्भटविदुषोऽस्य दार्शनिकग्रन्थबाहुल्यं विलोक्यावधार्यते यदसौ दर्शनशास्त्रे विशेषतो वेदान्तदर्शनेऽप्रतिहतगतिरासीत्। "मोडक" इत्यस्योपाधिः प्रतीयते। अस्योल्लेखः साहित्यसारस्य सरसामोदाख्यायां स्वोपज्ञव्याख्यायां स्वयमेवानेन कृतः। तद्यथा--

इति श्रीमत्पदवाक्यप्रमाणक्षीरार्णवविहरणश्रीमदद्वैतविद्येन्दिरारमणषष्ट्युपनामक-श्रीमन्नारायणशास्त्रिगुरुवरचरणारविन्दराजहंसायमानमानसेन मोडकोपनाम्नाऽच्युतशर्मणा विद्यार्थिना विरचितः।[4]

आचार्योऽयं 1834तमे वर्षे स्वर्यातः।[5] साहित्यसारमतिरिच्यानेनाचार्येण अनेकेषां ग्रन्थानां प्रणयनं कृतम्। तेषु केचन गीतिकाव्यात्मकाः, केचन नाटकचम्पूस्तोत्र-काव्यदर्शनादिविषयसम्बद्धा वर्तन्ते। एतदनन्दरं केषाञ्चिद् ग्रन्थानामुपरि एतेनाचार्येण व्याख्या अपि विहिताऽस्ति। यथापण्डितराजजगन्नाथविरचितस्य "भामिनीविलास" ग्रन्थस्योपरि 'प्रणय-प्रकाश' इत्यभिधाना टीका लिखिता। स्वप्रणीत-साहित्यसारस्य सरसामोदाख्या स्वोपज्ञा व्याख्या उपलभ्यते। एतेन प्रणीताः निम्नलिखित कृतयः समुपलभ्यन्ते-गीतिकाव्यम्-गीतासीतापतिः, नाटकम्-विशुद्धमाधवम्, चम्पूः भागीरथी-कथाचम्पूः, काव्यम्--श्रीकृष्णलीलामृतम्, स्तोत्रकाव्यम्, हेरम्बचरणामृतलहरी अथवा गणेशलहरी। एवमेव दर्शनशास्त्रसम्बद्धा एतद्विरचिता अनेके ग्रन्थाः दृष्टिपथमवतरन्ति। तद्यथा-अद्वैतसुधा, अद्वैतामृतमञ्जरी, अद्वैतजालजाता, अद्वैतराज्यलक्ष्मीः, अद्वैताधिकरण-

चिन्तनमणिमाला, दृश्यविषयताखण्डनमित्यादयः। एवं प्रकारेणैतेनाचार्येण त्रिंशत् ग्रन्थान् प्रणीय साहित्यपरम्परा सम्बर्धिताऽस्ति। आचार्यस्यास्य 'साहित्यसारमिति' नामा अत्यन्तं विशालकायः द्वादशरत्नात्मकः लक्षणग्रन्थः काव्यशास्त्रीयनाट्य-शास्त्रीयसिद्धान्तानां पोषकः सम्बर्धकश्चास्ति। प्राचीनैः आचार्यैः स्वस्वग्रन्थानां वर्गीकरणं यथा उन्मेष-उद्योत-प्रकाश-निमेषाननादिरूपेण कृतं तस्याः परम्परायाः अनुवाहकेनानेन साहित्यसारस्य विभाजनं 'रत्नेषु' विहितम्। ग्रन्थस्यास्य द्वादशसंख्यकानां रत्नानां पृथक्--पृथक् नामानि च कृतानि। रसगङ्गाधरालङ्कारकौस्तुभयोरनन्तरं काव्यशास्त्रीय-सिद्धान्तव्याख्यापकेषु ग्रन्थेषु महत्तमोऽयं ''साहित्यसारः'' विद्वत्समाजे तथा प्रचारितः नास्ति यथा प्रचारस्यायं योग्यतां वहति। अतः ग्रन्थेऽस्मिन् प्रतिपादितानां काव्यशास्त्रीयसिद्धान्तानां समुन्मीलनाय मयाऽत्र प्रयासो विधीयते। ग्रन्थास्यास्य प्रतिरत्नं सामान्यः परिचयः एवं वर्तते--

### प्रथमं धन्वन्तरिरत्नम्

रत्नेऽस्मिन् साहित्यस्वरूपं, काव्यप्रयोजनं, काव्यस्वरूपं, काव्यप्रभेदं, काव्यकारणञ्च वर्णितमस्ति। प्रायः सर्वैरेव भामहमम्मटादिभिः पूर्ववर्तिभिः आचार्यैः स्व-स्व काव्यशास्त्रीयग्रन्थेषु सर्वप्रथमं काव्यप्रयोजनं ततः काव्यकारणं तदनन्तरं काव्यस्वरूपं तस्य प्रभेदाश्च वर्णितास्सन्ति, किन्तु अच्युतरायेण एका नवीना सरणिः प्रयुक्ताऽस्ति, स्वकीये ग्रन्थरत्ने आचार्योऽसौ सर्वप्रथमं साहित्यस्वरूपं वर्णयति। तदनन्तरमसौ क्रमेण काव्यप्रयोजनं, काव्यस्वरूपं, काव्यभेदान् अन्ते च काव्यकारणं प्रस्तौति। इदमस्ति विषयप्रतिपादनक्रमेऽस्य वैलक्षण्यम्। वस्तुतस्तु अयमप्याचार्यः प्राक्तनानामाचार्याणां परम्परामनुवहन्नपि प्रायः सर्वत्रैव स्वकीये ग्रन्थे विषयप्रतिपादनक्रमे कामपि नवीनां दृष्टिं संदधाति। यथा कुन्तकादिभिराचार्यैः साहित्यशब्दव्याख्यानप्रसङ्गे नूतना सरणिरनुसृता तथैवाच्युतरायोऽपि अन्येनैव प्रकारेण साहित्यस्वरूपं निगदति। सः पार्वती-परमेश्वरयोः मिथुनीभाव एव साहित्यमिति निर्दिशन्नाह--

**साहित्यसारं शिवयोः सञ्चिन्त्य सुमनोऽनुगः।**
**साहित्सारं संविच्छ्रीविलासार्थं समुद्धरे।।**[7]

**''शिवयोः पार्वतीपरमेश्वरयोः साहित्यसारं साहित्यं मिथुनीभावस्तस्य सारो मुख्यांशस्तं तत्पुत्रं गजाननं सञ्चिन्त्य सुमनोऽनुगः सकलशास्त्रविद्वदनुसारीअहमच्युतरायः साहित्यसारं साहित्यशब्दवाच्यरसालङ्कारादिभिशास्त्ररहस्यं संविद् ब्रह्मविद्या सैव श्रीर्लक्ष्मीस्तया सह विहाराय समुद्धारे। यथा 'सुमनः' शब्दवाच्यादेवानुगतेनाच्युतेन श्रीविलासार्थं साहित्यस्य देवासुरसम्मेलनस्य सारं कौस्तुभादिकमुद्धतमेवं मयाऽपि एतद् रत्नं साहित्यशास्त्रजिज्ञासूनां कृते उद्धतमिति।''**[8] एवं प्रकारेण साहित्यस्याद्भुता व्याख्याद्घाटितात्र ग्रन्थकृता।



### काव्यप्रयोजनम्

काव्यप्रयोजनं प्रस्तुवताऽनेन प्रोच्यते यत् काव्यद्वारा स्वार्थपरार्थयो सिद्धिर्जायते। अयं च खलु स्वार्थः धर्मार्थकाममोक्षभेदात् चतुष्प्रकारकोऽस्ति। तद्यथा-

**काव्यादिस्वार्थमन्यार्थं चाथ स्वार्थश्चतुर्विधः।**
**धर्मादिः कीर्तिसम्पत्तितृप्तिमुक्ति वपुः क्रमात्।।**[9]

तदेव धर्माद्युदाहरणत्वेन विवृणोति-

**वाल्मीक्यादेरभूत्कीर्त्यै धावकादेः श्रियेऽपि च।**
**कामाप्तयै जयदेवादेर्मुद्गलादेस्तु मुक्तये।।**[10]

परार्थं विवृण्वन्नाचार्योऽच्युतरायः ब्रवीति यत्-

**जिज्ञासोः सुन्दरीरीत्या काव्यं समुपदेशकृत्।**
**ऐहिकामुष्मिकादेर्यत्सोऽयमन्यार्थ उच्यते।।**[11]

काव्यं कान्तासम्मिततयामधुरभाषणैः सुन्दरीरीत्या वा ऐहिकामुष्मिकादेः समुपदेशं करोति। वस्तुतस्त्वस्याचार्यस्य काव्यप्रयोजनपर्यालोचनेनेदमवगम्यते यत् यथा भामह-दण्डी-उद्भट-मम्मटादिभिः पूर्वाचार्यैः प्रतिपादितानि काव्यप्रयोजनानि कवेः स्वार्थाय परार्थाय च भवन्त्येव किन्तु पूर्वाचार्यैः स्वार्थ-परार्थभेदेन काव्यप्रयोजनस्य द्वैविध्यं न प्रतिपादितम् अच्युतरायमोडकस्तु सोदाहरणं तत्प्रतिपादयामासेति काव्यप्रयोजनप्रतिपादनेऽस्य किमपि वैशिष्ट्यमस्त्येव। काव्य-प्रयोजनानां व्यवस्थापनक्रमे व्याख्यापने च काचिन्नवीनता दृष्टिगता भवति।

### काव्यस्वरूपं प्रभेदाश्च

आचार्योऽच्युतरायः काव्यस्वरूपमित्थं प्रतिपादयति--

**तत्र निर्दोषशब्दार्थगुणवत्त्वे सति स्फुटम्।**
**गद्यादिबन्धरूपत्वं काव्यसामान्यलक्षणम्।।**[12]

अस्य विशिष्टं व्याख्यानं तेन स्वयमेव सरसामोदटीकायां कृतम्। यथा-''कौति सुशब्दरचनां करोतीति कविः तस्य कर्म काव्यमिति। शब्दो = रामादिः, अर्थः - सीताकान्तादिः शब्दश्चार्थश्चेति शब्दार्थौ, निर्गताः सुतरामविद्यमानाः दोषाः श्रुतिकटुत्वादिरूपाः शब्दादिदोषाः याभ्यां तौ तथा तयोर्ये गुणाः सौकुमार्यादयो विद्यन्ते यस्मिन् तत् काव्यमिति।''[13] एवं गद्यादिबन्धरूपत्वं तथा च निर्दोषशब्दार्थमयत्वमेवकाव्यपदवाच्यमिति। अच्युतरायः काव्ये दोषाणां सर्वथा अभावो स्यादिति अङ्गीकरोति। सः दोषसद्भावे कथमपि काव्यतां न समर्थयति। यथोक्तं तेनैव-

**दोषे सति गुणैः किं वा किं वालङ्करणैरपि।**
**अतो निर्दोषसाद्गुण्यमेवात्राद्रियतां बुधैः।।**[14]

एवमेव शब्दार्थयोः गुणत्वेन सः पूर्वाचार्यैरङ्गीकृतान् माधुर्यादिगुणान् एव न समर्थयति अपितु काव्ये काव्यत्वाधायकानि प्रायः सर्वाण्येव रसादितत्त्वानि तदतिरिक्तानि च कानिचिन् नव्यानि तत्वान्यपि गुणत्वेनैवाङ्गीकरोति। यथोक्तम्--

**धर्मा रसा लक्षणानि रीत्यलङ्कृतिवृत्तयः।**
**रसिकाह्लादका ह्येते काव्ये सन्ति च षड्गुणाः॥[15]**

काव्यप्रकाशकारस्तु माधुर्यादीन् गुणत्वेनाङ्गीकरोति किन्तु अयमाचार्यः धर्म-रस-लक्षण-रीति-अलङ्कृति-वृत्यादीनां समष्टिरूपमेव गुणत्वेन स्वीकुरुते। ग्रन्थकर्तुः इयं चात्र नवीना दृष्टिः परिलक्ष्यते।

मोडकः श.ब्दार्थोभयत्वं काव्यत्वेन स्वीकरोति। काव्यमिदं सरसकाव्यालङ्कृत-काव्यभेदात् द्विविधं वर्तते। सरसकाव्यस्यैवोत्तमोत्तमम् अथवा ध्वनिकाव्यमित्येकः भेदः द्वितीयश्चोत्तमकाव्यमित्ति। अनयोः ध्वनिकाव्यस्य अनेकाः भेदाः भवन्ति। सरसकाव्यञ्चाष्टप्रकारकं भवति। द्वितीयमलङ्कृतकाव्यमथवा चित्राख्यमिति काव्यं मध्यम-अधमभेदात् द्विप्रकारकं भवति। यत्र अर्थप्राधान्यं गुणीभूतशब्दत्वं तत्र "मध्यमकाव्यत्वम्" एवञ्च यत्र शब्दप्राधान्यं गुणीभूतार्थत्वं तत्राधमकाव्यत्वमिति निर्दिशति। यथोक्तं तेनैव-

**रसालङ्कारमुख्यत्वभेदेनेदं भवेद् द्विधा।**
**सरसाख्यं च चित्राख्यं स्वरम्भोरूशरीरवत्॥**
**तत्राद्यं तु द्विधा व्यङ्ग्यप्रधानगुणभावतः।**
**प्रथमं ध्वनिसंज्ञं स्यान्नानाभेद्युत्तमोत्तम्॥**
**द्वितीयं तूत्तमं ज्ञेयमष्टधा परिकीर्तितम्।**
**विवेकोदयतः सूर्यस्तप्तश्चन्द्रः कलङ्कितः॥**
**द्विधान्यमपि भूर्येव मध्यमं चाधमं क्रमात्।**
**गुणप्रधानभावेन मिथः शब्दार्थयोः स्थिते॥[16]**

इत्यम् आचार्योऽच्युतरायमोडकः काव्यं चतुष्प्रकारकं मनुते। यथा पण्डितराजजगन्नाथेन काव्यस्य चत्वारो भेदाः विहिताः तथैवानेनापि। परन्त्वत्रेदमवधेयमस्ति यत् अच्युतरायेण प्रथमं काव्यं ध्वनिसंज्ञं यस्यापरं नामोत्तमोत्तमम् इति कृतं पण्डितराजेन केवलम् उत्तमोत्तमम् इति नामप्रदत्तम्। द्वितीयकाव्यस्यानेनाप्युत्तममिति नाम प्रदत्तं इदं खलु पण्डितराजमतानुसारमेव। काव्यप्रकाशकर्त्रा राजानकमम्मटेन काव्यस्योत्तममध्यमाधममिति प्रकारत्रयमङ्गीकृतं, तत्र तेन तृतीयस्य शब्दचित्रवाच्यचित्रात्मकस्य अधमत्वमेवाङ्गीकृतम्। परन्त्वयमाचार्यः अर्थप्राधान्ये शब्दस्य गौणतायां मध्यमकाव्यम् एवञ्च शब्दप्राधान्ये-ऽर्थस्यगौणतायां अधमकाव्यमिति स्वीकरोति।



इत्थमाचार्योऽच्युतरायः शब्दार्थयोः काव्यत्वं स्वीकुर्वन् काव्यप्रभेदप्रसङ्गे, पण्डितराजजगन्नाथमतानुयायी प्रतिभाति परन्तु तत्रापि काचित् भिन्नता वर्तते सैव भिन्नता नवीनता च अस्य महत्त्वं विज्ञापयति।

## काव्यकारणम्

अच्युतरायः काव्यकारणविषयेऽपि पण्डितराजजन्नाथमेवानुसरति। यथोक्तं पण्डितराजेन-

"तस्य चं कारणं कविगता केवला प्रतिभा। सा च काव्यघटनानुकूलशब्दार्थोपस्थितिः तद्गतं च प्रतिभात्वं काव्यकारणताऽवच्छेदकतया सिद्धो जातिविशेष उपाधिरूपं वा खण्डम्। तस्याश्च हेतुः क्वचिद् देवतामहापुरुषप्रसादादिजन्यमदृष्टम् क्वचिच्च विलक्षणव्युत्पत्तिकाव्यकरणाभ्यासौ।"[17]

पण्डितराजमनुकुर्वन् अच्युतरायः काव्यकारणमित्थं प्रस्तौति-

**तद्धेतुस्तत्स्वरूपानुकूला शब्दाद्युपस्थितिः।**
**सा च देवतादिकृपया शास्त्राभ्यासादितोऽथवा॥[18]**

## द्वितीयमैरावतरत्नम्

रत्नेऽस्मिन् शब्दार्थशक्तीनां विस्तृतं तथा च सूक्ष्मविवेचनं प्रस्तुतमस्ति। साहित्यशास्त्रे तिस्रो वृत्तयः प्रवर्तन्ते ताः वृत्तयः यथास्वरूपमनेन स्वीकृताः, किन्तु तासां स्पष्टस्वरूपज्ञानाय उपमानानां काचित् नवीना कल्पना कृता। तद्यथा-

**त्रिधा वृत्तिभिदा शक्तिलक्षणाव्यञ्जनाह्वया।**
**मुग्धमध्यप्रगल्भाख्यावस्थया स्त्रीव भाति वाक्॥[19]**

अस्मिन् प्रसङ्गेऽनेन आचार्येण सरसामोदाख्यायां स्वोपज्ञव्याख्यायां व्याख्यानं प्रस्तुतं यत् तत्राङ्कुरितयौवना मुग्धा शक्तिवृतिवत्, समानलज्जामदना मध्या लक्षणावत्, पतिमात्रकेलिकलापकोविदा प्रगल्भा व्यञ्जनावत्, भवति। अवस्थानां त्रैविध्येऽपि जात्याभिप्रायेणैकवचनम्।

## तृतीयमिन्दिरारत्नम्

तृतीयेऽस्मिन् रत्ने आर्थीव्यञ्जनायाः स्वरूपं, भेदाः उदाहरणानि च प्रस्तुतानि सन्ति। अत्रायमाचार्यः प्रायः मम्मटमेवानुकरोति किन्तु उदाहरणप्रतिपादने वैज्ञानिकता रमणीयता सर्वत्रैव परिलक्ष्यते।

## चतुर्थं दक्षिणावर्तकम्बुरत्नम्

चतुर्थेऽस्मिन् रत्ने ध्वनेः सविस्तरं वर्णनमवाप्यते। "ध्वनिभेदानथ ब्रुवे" इत्युद्घोषपूर्वकमाचार्योऽच्युतरायः ध्वनिप्रभेदान् प्रस्तौति। सर्वप्रथमं सिद्धान्तोऽयं वैयाकरणैः

स्फोटसिद्धान्तत्वेन व्याख्यातः पश्चात् साहित्ये आनन्दवर्धनाचार्यैः सम्बर्धितः पोषितश्च, अग्रे सिद्धान्तोऽयं सर्वैरङ्गीकृतः विस्तारितश्च तथा चायं सिद्धान्तः काव्यशास्त्रस्य मान्यसिद्धान्तत्वेन राराजते। अयमप्याचार्यः ध्वनिविषये स्वीयामद्भुतां नवीनाञ्च दृष्टिं समुपस्थापयति। तद्यथा--

**प्रासङ्गिकं समाप्यैवं ध्वनिभेदानथ ब्रुवे।**
**सरसैः पदविन्यासैरूपागम इव श्रियः।।**[20]

ध्वनिभेदप्रभेदप्रसङ्गे आचार्योऽच्युतरायः निगदति यत्-

**उत्तमोत्तमकाव्याख्यो यो ध्वनिः प्रागुदाहृतः।**
**असंख्यातोऽप्यसौ शक्तिलक्षणामूलतो द्विधा।।**
**यत्रान्यपरमेवेष्टं वाच्यं स प्रथमो मतः।**
**अविवक्षितवाच्याख्यो द्वितीयोऽपि विपश्चिताम्।।**
**रसो वस्त्वप्यलङ्कार इति भेदात्त्रिधादिमः।**
**तत्रालक्ष्यक्रमव्यङ्ग्यो रससंज्ञो ध्वनिर्भवेत्।।**
**वस्त्वलङ्कारसंज्ञौ तु लक्ष्यव्यङ्ग्यक्रमौ मतौ।**
**शब्दार्थशक्तिमूलत्वभेदात्तौ द्विविधौ पुनः।।**
**द्विधाऽन्त्योऽर्थान्तरे वाच्यसङ्क्रमाच्च तिरस्कृतेः।**
**इत्येते सप्त सामान्या ध्वनिभेदाः स्वरा इव।।**[21]

एवं ध्वनेः भेदानन्तरं रसभेदस्थायिभावानुभावसात्त्विकप्रकारादीन् संवर्ण्य रसलक्षणदिविषयान् वर्णयति। इत्थं परिज्ञायते यत् अच्युतरायेण प्राक्तनानामाचार्याणां ध्वनिप्रभेदाः स्वीक्रियन्ते किन्तु स्वमते काचित् विशेषता प्रतिपाद्यते। अनेन चार्वाक्-सौत्रान्तिक-क्षपणक-दिगम्बर-कणाद-प्रभाकर-भाट्ट-शङ्कराद्याचार्याणां मतं समुपस्थाप्य खण्डन-मण्डनपुरस्सरं स्वाभिमतं प्रस्तुतम् अस्ति।

### पंचममश्वरत्नम्

पञ्चमे रत्ने गुणीभूतव्यङ्ग्यकाव्यस्य चर्चा चर्चिताऽस्ति अत्रापि मोडकः मम्मटमनुसरन्नपि किमपि नवीनमतं स्थापयति।

### षष्ठं विषरत्नम्

षष्ठे रत्ने दोषवर्णनं विशदतयाऽवाप्यते। अत्र सर्वैः पूर्वाचार्यैः प्रतिपादिता दोषास्तु व्याख्याताः एव तदतिरिक्ताः केचन स्वकल्पिताः दोषा अपि मोडकेन सोदाहरणं निरूपिताः।

### सप्तमं गुणरत्नम्

रत्नेऽस्मिन् काव्यात्मभूतरसस्योत्कर्षद्योतकानां गुणानां विवरणमवाप्यते। अत्रायमाचार्यः



पूर्ववर्तीनामाचार्याणां गुणवर्णनपुरस्सरं स्वमतं प्रस्तौति। तद्यथा-

**दोषमेवं प्रसार्याथगुणान् संवर्णयाम्यहम्।**
**भारतीक्षणसन्तोषलब्धये नियमात्मनः।।**
**गुणो हि द्विविधो दोषाभावात्मा प्रथमो मतः।**
**माधुर्यादिर्द्वितीयश्च क्षीरे शुद्धिसितादिवत्।।**[22]

दोषाभावः प्रथमो गुणः, द्वितीयश्च माधुर्यादिर्वर्तते। अग्रे विस्तारतः गुणवर्णने अनेनातीव सूक्ष्मता प्रदत्ताऽस्ति।

### अष्टमं कौस्तुभरत्नम्

अष्टमे रत्नेऽर्थालङ्काराणां वर्णनं समुपस्थापितम्। अत्रापि अनेन पूर्ववर्तिभिः-आचार्यैः प्रतिपादिताः अलङ्काराः स्वीकृताः ततः केचन स्वाभिमताः अलङ्काराः अपि सोदाहरणं समुपस्थापिताः।

### दशमं रम्भारत्नम्

दशमे रत्ने नायिकाप्रकारभेदाः वर्णितास्सन्ति। अत्रेदमवधेयमस्ति यत् मम्मटजगन्नाथादिभिराचार्यैः स्वीये ग्रन्थे नायिकादि-विषये नैव किमपि प्रोक्तं अनेन तद् विषये अपि चर्चा कृता।

### एकादशं चन्द्ररत्नम्

अत्र नायकवर्णमवाप्यते। मोडकेन भरत-धनञ्जय-धनिकादिभिः आचार्यैः प्रतिपादिताः नायकानां चत्वारं प्रकारां नैवाङ्गीकृताः प्रत्युत धीरोदात्त-धीरललित-धीरप्रशान्तादयोऽङ्गीकृता। धीरोद्धतः नैवाङ्गीकृतः। तद्यथा-

**उदात्तो ललितः शान्तस्त्रिधा नेता प्रकीर्तितः।**[23]

अत्रास्ति अस्याभिमते इयं भिन्नता। यदयं प्राचीनपरम्पराप्राप्तं धीरोद्धतं नैव स्वीकरोति।

### द्वादशममृतरत्नम्

अत्र मोडकः सम्भोगशृङ्गारस्य विशदविवेचनं कृत्वा ततः समस्तरत्नानां श्लोकसंख्यां, निर्दिश्य तदन्ते स्वगुरुस्मरणपूर्वकं ग्रन्थं समाप्तमकार्षीत्।

इत्येवं प्रकारेणाचार्योऽच्युतरायमोडकः स्वीये साहित्यसारे समग्रकाव्यशास्त्रीयतत्त्वानि समुपस्थापितवानस्ति। अयञ्च खलु ग्रन्थः शास्त्रीयतत्त्व-व्याख्यापकः वर्तते। संस्कृतजगति ग्रन्थस्यास्य समुपलब्ध्यनन्तरमेतस्य प्रवादस्योपशमो जायते यत् पण्डितराजजगन्नाथानन्तरं साहित्यशास्त्रीयग्रन्थानां सर्वथाऽभावो दृश्यते। नूनमेवास्योपलब्ध्यनन्तरमवलोकनान्ते च वक्तुं शक्यते यत् पण्डितराजजगन्नाथानन्तरं तथाहि विश्वेश्वरपण्डितानन्तरमपि च संस्कृतकाव्यशास्त्रकोषः अच्युतरायमोडकेन समृद्धिमानीतः।

❖

## सन्दर्भग्रन्थाः


1. संस्कृत वाङ्मय का बृहद् इतिहास (काव्यशास्त्रं अष्टमं खण्डम्) सम्पादकः डॉ. बलदेव उपाध्यायः, प्रकाशकः--उत्तरप्रदेश संस्कृत संस्थानम् , लक्ष्मणपुरम्, पृ.374

2 New Catalogus Catalogorum, Edited by--V. Raghvan, Published from Madras University, 1940, p.59

3. तत्रैव

4. साहित्यसारम्, सम्पादकः - डॉ. ददन उपाध्यायः, प्रकाशकः - सम्पूर्णानन्द संस्कृत विश्वविद्यालयः

5. संस्कृतवाङ्मयकोश (प्रथमखण्ड), सम्पादकः - डॉ. श्रीधरभास्करवर्णेकर, प्रकाशकः - भारतीयभाषापरिषद्, कोलकाता, पृ. 418

6. New Catalogus Catalogorum, Edited by-V. Raghvan

7. साहित्यसारस्यधन्वन्तरिरत्ने श्लो. 3

8. तत्रैव, श्लो. 7

9. तत्रैव, सरसामोदव्याख्याम्, पृ.सं. 2

10. तत्रैव, श्लो. 8

11. तत्रैव, श्लो. 10

12. तत्रैव, श्लो. 1

13. तत्रैव, स्वोपज्ञसरसामोदटीकायाम्, पृ.सं. 9

14. तत्रैव, श्लो. 19

15. तत्रैव, श्लो. 20

16. तत्रैव, श्लो. 28, 29, 31, 32

17. रसगङ्गाधरे प्रथमानने

18. साहित्यसारे, श्लो. 34

19. साहित्यसारस्य द्वितीये ऐरावतरत्ने, श्लो. 2

20. साहित्यसारस्य चतुर्थे दक्षिणावर्तकम्बुरत्ने, श्लो. 1

21. साहित्यसारस्य चतुर्थे दक्षिणावर्तकम्बुरत्ने, श्लो. 2-3-4-5-6

22. साहित्यसारस्य सप्तमे गुणरत्ने, श्लो.1-2

23. साहित्यसारस्य एकादशे चन्द्ररत्ने, श्लो. 2


❖